# वेङ्कटार्य-वेदान्त-कारिकावली①

वेङ्कटार्यः

# वेङ्कटार्य-वेदान्त-कारिकावली①


1. ॐ
2. ०१ प्रत्यक्ष-निरूपणान्तम्
3. ०२ अनुमान-निरूपणम्
4. ०३ शब्द-निरूपणम्
5. ०४ प्रकृति-निरूपणम्
6. ०५ काल-निरूपणम्
7. ०६ नित्य-विभूति-निरूपणम्
8. ०७ धर्मभूतज्ञान-निरूपणादि
    1. ज्ञानम्
    2. भक्ति-प्रपत्ती
9. ०८ जीव-निरूपणम्
10. ०९ ईश्वर-निरूपणम्
11. १० अद्रव्य-निरूपणम्
12. Appendix - +Dyugangā द्युगङ्गा
    1. Goals ध्येयानि
        1. संस्कृतानुवादः
        2. Contribution दानम्

ॐ①

# ०१ प्रत्यक्ष-निरूपणान्तम्①

▼ *विश्वास-प्रस्तुतिः*

श्रीमद्-रमा-धवोपज्ञां
**नत्वा** ऽऽचार्य-परम्पराम् ।
**कुर्वे** लक्ष्मण-सिद्धान्त-
कारिकां कारिकावलीम् ॥ १.१॥

▼ *कृष्णमाचार्यः (En)*

1. After bowing down in salutation to the line of spiritual teachers beginning with the Lord of S'ri (Bhagavan Nārāyaṇa) I write the work Karikavali on the principles of the doctrine expounded by S'ri Rāmā- nuja.

▼ *विश्वास-प्रस्तुतिः*

मान-मेय-विभेदेन
पदार्थो द्वि-विधो मतः ।
मानं प्रत्यक्षानुमान-
शब्द-भेदात् त्रिधा भवेत् ॥ १.२॥

▼ *कृष्णमाचार्यः (En)*

2. The entire Padarthas or entities are of two kinds—Māna (Means of valid knowledge) and Meya (The object of such knowledge). The Mana is again of three divisions- Pratyaksa (Perception), Anumāna(Inference) and S'abda (Verbal testimony).

▼ *विश्वास-प्रस्तुतिः*

प्रमेयं द्विविधं प्रोक्तं
द्रव्याद्रव्य-विभेदतः ।
जडाजडत्व-भिन्नेऽत्र
द्रव्ये, तद् द्विविधं जडम् ॥ १.३॥

▼ *कृष्णमाचार्यः (En)*

3. The Meya is of two kinds — Dravya (Subs- tance) and Adravya (Non-Substance). Among these two divisions, the Dravya is of two kinds-Jaḍa and Ajada. The Jada is of two kinds.

[Note. The Jada is that which can be cognized For instance the only with the aid of external means. Pot can be cognized only with the aid of our knowledge.*(5)* If the knowledge ceases to function, the pot cannot be cognized. But the case of Ajada is different. It is cognizable even without the aid of external means. For instance the Atman is cognizable by self even with out the aid of the knowledge. Likewise the cognition [[४]] which is an attribute of the Atman is cognizable by him even without the aid of external means i.e. another knowledge, when it operates with an object.]

▼ *विश्वास-प्रस्तुतिः*

*(जडम्)* प्रकृतिः काल इत्य्, आद्या
चतुर्विंशतिधा मता ।
कालस् तूपाधि-भेदेन
त्रिविधः परिकीर्त्यते ॥ १.४॥

४

▼ *कृष्णमाचार्यः (En)*

4. The two kinds of Jaḍadravya are Prakṛti (The Primary Matter) and Kāla (Time). The former i.e., Prakrti is of twenty-four kinds. The Kala is said to be of three divisions due to its Upadhis (Limiting adjuncts).

▼ *विश्वास-प्रस्तुतिः*

अजडं तु पराक् प्रत्यग्
इति भेदाद् द्वि-धा स्थितम् ।
पराङ् नित्य-विभूतिश् च
धर्म-भूत-मतिस् तथा ॥ १.५॥

५

▼ *कृष्णमाचार्यः (En)*

5. The Ajada is held to be of two kinds — Parāk and Pratyak. The Parāk are—— Nityavibhūti (The eternal world) and Dharmabhutajñāna (The attributive knowledge).

[The Parāk is that which is not Self-aware. The Pratyak is that which is Self-aware. These two may be equalized with Inanimate and Animate respectively.]

▼ *विश्वास-प्रस्तुतिः*

प्रत्यग् जीवेश्वर-भिदा-
शाली, जीवः पुनस् त्रिधा ।
बद्धो मुक्तो नित्य इति
बद्धस् तु द्विविधो भवेत् ॥ १.६॥

६

▼ *कृष्णमाचार्यः (En)*

6. The Pratyak is of two kinds-Jiva (Individual Souls) and Iśvara (The Ruling Supreme Soul). The Jiva is again of three kinds-Baddha (Bound in Samsāra), Mukta (Freed from Samsāra) and Nitya (Eternally freed from Samsara or never bound in Samsāra). The Baddha is of two kinds.

▼ *विश्वास-प्रस्तुतिः*

बुभुक्षुश्च मुमुक्षुश्च
बुभुक्षुश्च पुनर्द्विधा ।
अर्थकामपरो धर्म-
परश्चेति विवेचनात् ॥ १.७॥

▼ *कृष्णमाचार्यः (En)*

7. They are-Bubhuksu (Desirous of worldly enjoyments) and Mumuksu (Desirous of freedom from Samsara and divine bliss.) The Bubhukṣu is again of two kinds-Arthakamapara (Addicted to worldly wealth and pleasure) and Dharmapara (Addicted to Dharma).

▼ *विश्वास-प्रस्तुतिः*

अन्यदेवपरो विष्णु-
परो धर्मपरो द्विधा ।

मुमुक्षुरपि कैवल्य-
मोक्षयोगाद् द्विधा मतः ॥ १.८॥

▼ *कृष्णमाचार्यः (En)*

8. The Dharmapara is of two kinds-Anyadevapara (Addicted to the deities other than Visnu) and Visṇupara (Addicted to Visnu alone ). And the Mumukṣu is of two kinds-Kaivalyapara (Addicted to Kaivalya) and Mokşapara (Addicted to Moksa).

[There is vast difference between Kaivalya and Mokṣa. The former is the Self-realization and the latter is the enjoyments of extreme bliss of Paramātman in his eternal abode.]

▼ *विश्वास-प्रस्तुतिः*

भक्त-प्रपन्नभेदेन
स तु मोक्षपरो द्विधा ।
द्विधा प्रपन्न एकान्ति*(="भगवान् एक एवोपायः")*
परमैकान्ति*(="भगवान् एक एवोपायोपेयौ")*-भेदतः ॥ १.९॥

▼ *कृष्णमाचार्यः (En)*

9. The Moksapara is of two kinds – Bhakta (Resorting to Bhaktiyoga) and Prapanna (Resorting to

The Prapanna is of two kinds- . Ekantin and Paramaikantin.

[He is Ekantin who seeks the Mokṣa along with other worldly enjoyments from Bhagavan alone.
The Paramaikantin does not desire any other enjoyments except the Bhagavan.

Or he is Ekantin who is resolved to attain Mokṣa by Prapatti alone taking it as a means.
But he is Paramaikantin who is resolved to attain Mokṣa by the means of Bhagavan alone. That is-for him Bhagavan alone is Upaya and Upeya.]

▼ *विश्वास-प्रस्तुतिः*

दृप्त आर्त इति द्वेधा
परमैकान्त्युदाहृतः ।
ईश्वरः पञ्चधा भिन्नः
पर-व्यूहादि-भेदतः ॥ १.१०॥

▼ *कृष्णमाचार्यः (En)*

10. The Paramaikāntin is told to be of two kinds-Drpta (Patient of delay) and Arta (Impatient of delay). Isvara is known to be in five-fold forms- Para, Vyūha and so on.

[The five-fold forms are— Para, Vyūha, Vibhava, Antaryāmin and Arca.]

▼ *विश्वास-प्रस्तुतिः*

पर एकश्, चतुर्धा तु
**व्यूहः** स्याद् वासुदेवकः ।
सङ्कर्षणश् च प्रद्युम्नो
ऽनिरुद्ध इति भेदतः ॥ १.११॥

[[८]]

▼ *कृष्णमाचार्यः (En)*

11. Para is only one. But Vyuhas are four-fold, namely - Vasudeva, Samkarsana, Pradyumna and Aniruddha.

▼ *विश्वास-प्रस्तुतिः*

मत्स्यादयस्तु विभवा
अनन्ताश्च प्रकीर्तिताः ।
अन्तर्यामी तु भगवान्
प्रति-देहम् अवस्थितः ॥ १.१२॥

▼ *कृष्णमाचार्यः (En)*

12. Vibhava forms are told as innumerable constituting Matsya (Fish) and so on. Iśvara abides in every things else as Antaryāmin (Inner Ruler).

▼ *विश्वास-प्रस्तुतिः*

**अर्चावतारः** श्रीरङ्ग-
वेङ्कटाद्र्य्-आदिषु स्थितः ।
केशवादि तु तत्त्वज्ञैर्
**व्यूहान्तरम्** उदाहृतम् ॥ १.१३॥

▼ *कृष्णमाचार्यः (En)*

13. Arcās or Images are His avatāras or incarnations enshrined in sacred temples such as SriRangam, Venkatadri etc. The Kesava and other forms are mentioned by the wise as different Vyuhas.

▼ *विश्वास-प्रस्तुतिः*

सत्त्वं रजस् तमः शब्द-
स्पर्श-रूप-रसास् तथा ।
गन्धः संयोग-शक्ती चेत्य्
**अद्रव्यं** दशधा मतम् ॥ १.१४॥

▼ *कृष्णमाचार्यः (En)*

14. The Sattva (Goodness), Rajas ( Motivity), Tamas (Darkness or Dullness), S'abda (sound), Sparśa (touch), Rūpa (colour), Rasa (taste), Gandha ( odour), Samyoga (union) and S'akti (Potency) are the ten kinds of Adravya (Non-Substance).

▼ *विश्वास-प्रस्तुतिः*

प्रमायाः करणं तत्र
**प्रमाणं** परिकीर्तितम् ।
यथावस्थित-वस्त्व्-एक-
व्यवहारानुगा **प्रमा** ॥ १.१५॥

▼ *कृष्णमाचार्यः (En)*

15. The Pramāna is that which is an instrument or means for the Prama (Valid knowledge). The Prama is the knowledge from which proceeds the verbal usage of a thing in its true and essential nature.

▼ *विश्वास-प्रस्तुतिः*

सा संशयान्यथा-ज्ञान-
विपरीत-धियो न हि ।

एक-धर्मिक-नानार्थ-
विषया धीस् तु **संशयः** ॥ १.१६॥

[[१०]]

▼ *कृष्णमाचार्यः (En)*

16. The Prama is distinct from Samsaya (doubt) Anyathajñāna (error) and Viparitadhi (error in reverse nature). Samśaya is the knowledge of a thing with various contrary attributes.

[For instance—Is this a post or a man?]

▼ *विश्वास-प्रस्तुतिः*

धीस् तु धर्म-विपर्यासे
**ऽन्यथाज्ञानम्** उदाहृतम् ।
सैव धर्मि-विपर्यासे
**विपरीत-मतिर्** मता ॥ १.१७॥

▼ *कृष्णमाचार्यः (En)*

17. The Anyathājñana ( error) is the knowledge of a thing with a false attribute. The Viparitadhi (error in revese nature) is the knowledge mistaking a thing itself for another thing.

[Anyathājñāna is — The conch is yellow. Viparitadhi is-This (shell) is silver.]

▼ *विश्वास-प्रस्तुतिः*

साक्षात्कार-प्रमा-हेतुः
**प्रत्यक्षं** मानम् ईरितम् ।
स-विकल्पो निर्विकल्पः
**साक्षात्कारो** द्विधा भवेत् ॥ १.१८॥

▼ *कृष्णमाचार्यः (En)*

18. The Pratyaksapramāna is that which causes the perceptive and valid congnition. The perception is of two kinds-Savikalpa and Nirvikalpa.

▼ *विश्वास-प्रस्तुतिः*

ग्रहः प्रथम-पिण्डस्य
निर्विकल्पक उच्यते ।
*(प्राग्-दृष्ट-स्मृतेः परं)* द्वितीय-पिण्ड-ग्रहणं
सविकल्पक-धीर् भवेत् ॥ १.१९॥

▼ *कृष्णमाचार्यः (En)*

19. The Nirvikalpaka is the cognition of a first thing perceived for the first time. The Savikalpaka is the cognition obtained by the perception of another thing of the same kind that was perceived once before with a recollection on it.

▼ *विश्वास-प्रस्तुतिः*

एतद् *(साक्षात्त्वम्)* इन्द्रिय-सापेक्षम्
अनपेक्षञ्च दृश्यते ।
अनपेक्षं स्वतः-सिद्धं *(योगादिना)*
दिव्यं चेति द्विधा मतम् ॥ १.२०॥

▼ *कृष्णमाचार्यः (En)*

20. This perception is also of another two kinds : Indriyāpekṣa (Dependent on senses) and Indriyanapekṣa (Independent on senses). The latter is also of two kinds : Svatassiddha (Self-acquired) and Divya (Divine).

▼ *विश्वास-प्रस्तुतिः*

योगजं तु स्वतः-सिद्धम्
अन्यत् स्वामि-प्रसादजम् ।
**अर्वाचीनम्** इदं सर्वम्
आमनन्ति विचक्षणाः ॥ १.२१॥

▼ *कृष्णमाचार्यः (En)*

21. Svatassiddha is a perception acquired through the power of yoga and the other i.e. Divya is obtained by the grace of the Lord Bhagavan. The wise men call all these as recent.

▼ *विश्वास-प्रस्तुतिः*

नित्य-मुक्तेश्वर-ज्ञानम्
**अनर्वाचीनम्** उच्यते ।
**स्मृतिः** प्रमैव प्राचीना-
ऽनुभवाज् जायते हि सा ॥ १.२२॥

▼ *कृष्णमाचार्यः (En)*

22. The perception of the Nityas, Muktas and Isvara is called ancient. The Smrti (Recollection) also is Prama (Valid Cognition) since it is produced by the previous apprehension (Anubhava).

[[१३]]

▼ *विश्वास-प्रस्तुतिः*

सदृशादृष्ट-चिन्ताद्यैः
संस्कारोद्बोधने सति *(सा स्मृतिः)*।
स्मृतिवत् **प्रत्यभिज्ञा** ऽपि
प्रत्यक्षे ऽन्तर् भवत्य् असौ ॥ १.२३॥

▼ *कृष्णमाचार्यः (En)*

23. The Smrti is produced when the Samskāra (Reminiscent impression) is aroused by seeing a similar thing, Adrsta (Invisible effect of Karman) and Cinta (Deep thinking) etc. Like recollection, Pratyabhijñā (Recognition) also is included under Perception.

▼ *विश्वास-प्रस्तुतिः*

पुण्य-पूरुष-निष्ठा ऽपि
**प्रतिभा** ऽत्रैव सम्मता ।
"यथार्थं सर्व-विज्ञानम्"
इति यामुन-भाषितम् ॥ १.२४॥

▼ *कृष्णमाचार्यः (En)*

24. Pratibha (The intuitive faculty of Mind) seen in blessed persons also is included under Perception. It is said by Sri Yamunācārya that all knowledge is real.

▼ *विश्वास-प्रस्तुतिः*

*(अभावस्य पदार्थान्तरत्वं निराकरोति-)*
भूतले तु घटाभावो
भूतलात्मैव नेतरः ।
मृद्-घटस्य प्राग्-अभावो
ध्वंसस् तस्य कपालकम् ॥ १.२५॥

▼ *कृष्णमाचार्यः (En)*

25. The Non-existence of a pot on the earth is nothing but the surface of the earth. The Prāgabhāva (Antecedent non-existence) of a pot is nothing but the clay. And the Pradhvamsa (destruction) of a pot is nothing but the kapāla (the potsherds).

▼ *विश्वास-प्रस्तुतिः*

*(अन्योन्याभावस्य पार्थक्यं निराकरोति—)*
स्वासाधारणधर्मो हि
**भेद**-शब्देन कीर्त्यते ।
*("तर्हि घटत्वमित्यत्र न पटाकाङ्क्षा, भिन्न" इति भेद-व्यवहारे तु)*
शब्द-स्वाभाव्य-जा क्वापि
प्रतियोगित्व-धीः कृता ॥ १.२६॥

▼ *कृष्णमाचार्यः (En)*

26. The peculiar or uncommon quality of a thing is mentioned by the term Bheda. That the word Bheda invariably requires the Pratiyogin (The counter correlate) is due to the nature of that word.

▼ *विश्वास-प्रस्तुतिः*

अन्तःकरण-चैतन्यं
तद्-वृत्त्या विषयेण च ।
चैतन्यं समताऽऽपन्नं
साक्षात्-कारम् अजीजनत् ॥ १.२७॥

इत्य्-आदि-वचनं सर्वं
परोक्तं नात्र सम्मतम् ।
सामान्यं समवायश् च
विशेषो नात्र सम्मतः ॥ १.२८॥

▼ *कृष्णमाचार्यः (En)*

27. "The consciousness limited by Antaḥkaraṇa (The internal organ) when becomes closely joined with and non-different from its two other manifestations due to the connection with Vṛtti (activity) and Visaya (the object) brings forth the perceptual consciousness."

28. These and other similar sayings of the philosophers of other schools are not acceptable to us. The Sāmānya (generality), Samavāya (Inherent contact) and Visesa (particularity) are not acceptable to us.

▼ *विश्वास-प्रस्तुतिः*

सङ्ख्यादि-गुण-वर्गस्य
गुण-पार्थक्य-कल्पनम् ।

सूत्र-कार-विरुद्धं यत्
तत् सर्वं परिहास्यते ॥ १.२९॥

▼ *कृष्णमाचार्यः (En)*

29. The enumeration of Samkhyā (number) etc. as separate guṇas (qualities) as distinct from our ten guṇas is contradicted by the Sutrakāra himself and therefore is rejected.

इति वेदान्तकारिकावल्यां प्रत्यक्षनिरूपणं प्रथमं प्रकरणम् ।

# ०२ अनुमान-निरूपणम्①

▼ *विश्वास-टिप्पनी*

विस्तारः अत्र1 ।

▼ *विश्वास-प्रस्तुतिः*

अनुमित्य्-आत्म-विज्ञाने
**ऽनुमानं** करणं स्मृतम् ।
तच् च लिङ्ग-परामर्शस्
तद्-धेतुर् व्याप्ति-धीर् मता ॥ २.१॥

▼ *कृष्णमाचार्यः (En)*

1. Anumana (Inference) is the instrument of Anumiti (Inferential cognition). The Anumāna is defined as Linga-Paramarśa (Consideration of middle term). Vyāpti-jñāna (Apprehension of invariable concomitance) is said to be the cause of Paramarśa (consideration).

१८

▼ *विश्वास-प्रस्तुतिः*

साध्याभावाधिकरणावृत्तित्वं **व्याप्तिर्** उच्यते ।
व्याप्यस्य *(पर्वतवत्-)*पक्ष-वृत्तित्व-धीः **परामर्श**-नाम-भाक् ॥ २.२॥

▼ *कृष्णमाचार्यः (En)*

2. Vyapti (Invariable concomitance) is that the Hetu (Reason) does not exist where Sadhya (The property to be established) is not found. Paramarśa (consideration) is the knowledge of Vyapya (the middle term) as existing in Paksa (Minor term or the subject).

▼ *विश्वास-प्रस्तुतिः*

तज*(=परामर्श)*-जा पक्षे साध्य-मतिर्
**अनुमित्य्**-आत्मिका मता ।
भूयिष्ठ-साहचर्यैक-
ज्ञानेन **व्याप्ति**-धीर् भवेत् ॥ २.३॥

▼ *कृष्णमाचार्यः (En)*

3. Anumiti is the Cognition produced by Paramarśa, with reference to the fact that Sadhya is existant in Paksa (the subject ). Vyāpti-jñana (Apprehension of invariable concomitance) springs from frequent observation of Sadhya and Reason as invariably concomitant each other.

1

▼ *विश्वास-प्रस्तुतिः*

तत्*(=साहचर्य-ज्ञान)*-स-पक्षे - **स-पक्षस्** तु
पूर्वं निश्चित-साध्यकः ।
सन्दिग्ध-साध्यकः **पक्षो**,
**वि-पक्षस्** तद्-अभाववान् ॥ २.४॥

▼ *कृष्णमाचार्यः (En)*

4. That observation should be held in Sapakṣa (Definite instance). The Sapaksa is that in which the Sadhya is definitely known to have existed. The Pakṣa (the minor term or the subject) is that in which the existence of Sadhya is doubtful. The Vipakṣa (the nagative instance) is that in which Sadhya is known definitely non-existent.

[[१९]]

▼ *विश्वास-प्रस्तुतिः*

अन्वयी *(= यत्र a → b)* व्यतिरेकी *(= यत्र ¬b → ¬a)* च
किञ्च **हेतुर्** द्विलक्षणः ।
*(व्याप्त्य्-अभावे)* व्यभिचारी, *(सर्वत्र-व्याप्त्य्-अभावे)* विरुद्धश्,
*(स्वरूप-+आश्रय-उपाधिष्व् एकतमस्य वाऽसिद्धत्वात् पक्ष-धर्माभावे)*
चासिद्धः, सत्-प्रतिपक्षकः ... *(हेत्वाभासाः)*॥ २.५॥

▼ *विश्वास-प्रस्तुतिः*

बाधितश् चेति पञ्चैते
**हेत्व्-आभासा** न साधकाः ।
एवं *(स्वगत-निश्चयार्थस्य)* **स्वार्थानुमानस्य**
प्रपञ्चस्तु निरूपितः ॥ २.६॥

▼ *कृष्णमाचार्यः (En)*

बाधित इति । अयमेव कालात्ययापदिष्ट इत्यप्युच्यते । साध्याभाववत्प- क्षको हेतुर्बाधितः । यथा वह्निरनुष्णः पदार्थत्वात् जलवदिति। अत्र वह्नौ अनुष्णत्वं नास्ति । एते पञ्चापि हेत्वाभासाः हेतुवदापाततो भासन्ते । निष्कर्षे तु न हेतव इत्यर्थः । तस्मात् ते न साध्यस्य साधकाः ।

अनुमानस्य स्वार्थपरार्थत्वभेदेन द्वैविध्यम् अभिप्रेत्य पूर्वोक्तः प्रपञ्चः स्वार्थानुमानस्येत्याह- एवमिति ।
स्वस्य निष्कर्षार्थं प्रवृत्तं स्वार्थम् ।
परबोधनार्थं प्रवृत्तं परार्थम् । ६

▼ *कृष्णमाचार्यः (En)*

5-6. The Hetu (Reason) is of two kinds — Anvayin (Positive) and Vyatirekin (Negative). The faulty Reasons are unfit to establish the Sadhya by inference. They are five in number, namely - Vyabhicārin (Transgressing), Viruddha (Adverse), Asiddha (Not-established), Satpratipaksa (Having counter-Reason) and Bādhita (Contradicted).

Thus the inference of Svārtha (For one's own ) has been described in detail.

▼ *विश्वास-प्रस्तुतिः*

न्याय-जन्यः परामर्शः
परार्थानुमितेः कृते ।
**न्यायो** ऽवयव-वाक्यानि
*(वक्ष्यमाणानि)* प्रतिज्ञादीनि पञ्च च ॥ २.७॥

▼ *कृष्णमाचार्यः (En)*

7. In the case of Parārthānumāna ( Inference for other's sake), the Parāmarśa (the consideration of Reason) is produced by the Nyāya (syllogism). The group of the five argumentative sentences namely- Pratijña (Assertion) etc. is called Nyāya.

▼ *विश्वास-प्रस्तुतिः*

**प्रतिज्ञा** साध्यनिर्देशो
**हेतुस्** तद्वचनं मतम् ।

व्याप्त्य्-उक्ति-पूर्व-दृष्टान्त-
वाग् **उदाहरणं** भवेत् ॥ २.८॥

▼ *कृष्णमाचार्यः (En)*

8. Pratijñā is mentioning the Sādhya. Hetu is mentioning the Reason. Udaharana is mentioning the example with the statement of Vyapti (concomitance).

▼ *विश्वास-प्रस्तुतिः*

*(धूमवद्-)*व्याप्यस्य पक्ष-वृत्तित्व-
बोधश् **चोपनयो** मतः ।
उपसंहार-वचनं
भवेन् **निगमनं** पुनः ॥ २.९॥

▼ *कृष्णमाचार्यः (En)*

9. Upanaya is the statement of Vyāpya (Middle term) as existing in Paksa (the subject). Nigamana is the statement concluding the syllogism.

इति वेदान्तका रिकावल्यामनुमाननिरूपणं द्वितीयं प्रकरणम्

---

1. https://vishvAsa.github.io/AgamaH/AryaH/hinduism/branches/nyAya-vaisheShike/pramA/anumitiH/

# ०३ शब्द-निरूपणम्①

▼ *विश्वास-प्रस्तुतिः*

अनाप्तानुक्तवाक्यं यत्
तच् छाब्द-करणं स्मृतम् ।
वेदस्यापौरुषेयत्वात्
तत्र लक्षण-सङ्गतिः ॥ ३.१॥

▼ *कृष्णमाचार्यः (En)*

1. The sentence which is not uttered by non- trustworthy person, is considered as the means of the verbal cognition. Because there is no any human origin for the Veda, this definition is applicable in the case of Veda also.

▼ *विश्वास-प्रस्तुतिः*

*(अम्बा तात इत्य्-आद्य्-अङ्गुलि-निर्देशा इव)*
सिद्धे *(शब्द-)*व्युत्पत्ति--सद्-भावाद्
वेदो निष्पन्न*(-ब्रह्म)*-बोधकः ।
तत्*(→ततः [वेदान्त-वाक्येषु])* कार्य-परता-हानेर्
अप्रामाण्यं न शङ्क्यताम् ॥ ३.२॥

▼ *कृष्णमाचार्यः (En)*

2. The Veda can teach us about the Brahman which is already in existence, as the words are capable of denoting the things already existent. Therefore the authoritativeness of the Vedanta passages should not be questioned as there is no truth in saying that a word can denote only the thing which is to be accomplished.

▼ *विश्वास-प्रस्तुतिः*

कर्म-ब्रह्माभिधायित्वात्
स च भागद्वयात्मकः ।
पूर्व-भागः कर्मपर
उत्तरो ब्रह्म-गोचरः ॥ ३.३॥

▼ *कृष्णमाचार्यः (En)*

3. The Veda has two parts—one dealing with the Karman and the other with the Brahman. The former part deals with the Karman and the latter with the Brahman.

▼ *विश्वास-प्रस्तुतिः*

तद्-ऐक्यात् पूर्व-परयोर्
व्याख्ययोर् **एक-शास्त्रता** ।
अध्याय-भेदवद् भेदे
शास्त्रैक्यं न विरुध्यते ॥ ३.४॥

▼ *कृष्णमाचार्यः (En)*

4. As the text of entire Veda comes under one head (Veda) with its two parts, its explanatory treatise also should come under a single head (Mimāmsā) with its two parts (Purva and Uttara). The internal difference of the subjects of each of the parts does not stands in the way of oneness of Mimamsā as in the case of adhyayas of each part.

▼ ***विश्वास-प्रस्तुतिः***

विध्य्--अर्थ-वाद--मन्त्रात्मा
त्रिविधः स प्रतीयते ।
अनुष्ठेयार्थ-गमको
**मन्त्रः** स्याद्, **अर्थ-वाद-गीः** … ॥ ३.५॥

▼ ***कृष्णमाचार्यः (En)***

5. It is of three kinds : Vidhi, Arthavāda and Mantra. Mantra is that which indicates the thing to be performed by the agent. The term Arthavāda may be defined thus:

▼ ***विश्वास-प्रस्तुतिः***

प्रवृत्त्य्-उत्तम्भिका या स्याद्,
**विधिर्** वाक्यं प्रवर्तकम् ।
स त्रिधा ऽपूर्व*(←"यजेत")*-‍-नियम*(←"व्रीहीनवहन्ति")*-
परिसङ्ख्या*(←"पञ्च पञ्चनखा भक्ष्याः")*-विभेदतः ॥ ३.६॥

▼ ***कृष्णमाचार्यः (En)***

6. Arthavada is that which induces the agent to perform the action. Vidhi is that which enjoins something on the agent. Vidhi is of three varieties: Apūrva, Niyama and Parisamkhya.

▼ ***विश्वास-प्रस्तुतिः***

नित्या नैमित्तिकाः काम्या
इति ते *(विधयो)* बहुधा मताः ।
तेषां स्व-रूप-लक्ष्माणि
मन्तव्यानि नयान्तरे ॥ ३.७॥

▼ ***कृष्णमाचार्यः (En)***

7. Again Vidhis are of various kinds : Nitya, Naimittika, Kamya and so won. The nature and characteristics of these varieties may be understood from other works.

▼ ***विश्वास-प्रस्तुतिः***

छन्दः कल्पश्च शिक्षा च
निरुक्तं ज्यौतिषं तथा ।
व्याकृतिश् चेति वेदस्य
षड् **अङ्गानि** प्रचक्षते ॥ ३.८॥

▼ ***कृष्णमाचार्यः (En)***

8. Chandas, Kalpa, Siksā, Nirukta, Jyautisa and Vyakaraṇa. Wise men say that these are six auxiliary works of the Veda.

▼ ***विश्वास-प्रस्तुतिः***

अनुष्टुब्-आदिकं **छन्दः**,
**कल्पः** श्रौतादि-बोधकः ।
वर्ण-निर्णायिका **शिक्षा**,
**निरुक्तं** स्वार्थ-बोधकम् ॥ ३.९॥

▼ ***कृष्णमाचार्यः (En)***

9. Chandas treats on metre such as anustubh etc. Kalpa deals with the rules and regulations on the performance of S'rauta and other rites. S'ikṣa is a treatise on phonetics. Nirukta gives a glossary

on certain important Vedic words.

▼ *विश्वास-प्रस्तुतिः*

अनुष्ठानादि-कालस्य
निर्णये ज्यौतिषं भवेत् ।
सौशब्द्याय व्याकरणम्
इति साङ्गे *(वेदे)* प्रमाणता ॥ ३.१०॥*(5)*

▼ *कृष्णमाचार्यः (En)*

10. Jyautisa is a science dealing with the fixation of proper time for the performance of Vedic rites etc. Vyakaraṇa gives the grammatical rules for correct formation of the words. Thus the Veda together with its auxiliaries is to be held authoritative.

▼ *विश्वास-प्रस्तुतिः*

एतन्-मूलतया स्मृत्यादीनां प्रामाण्यम् ईरितम् ।
एतद्-विरुद्धं यत्-किञ्चिन् नाश्नुवीत प्रमाणताम् ॥ ३.११॥

▼ *कृष्णमाचार्यः (En)*

11. It is also said that the S'mṛtis and other works which are based on the Veda are held as authoritative. The work whichever is opposed to the Veda is not authoritative.

[[२८]]

▼ *विश्वास-प्रस्तुतिः*

आकाङ्क्षादिकम् एतच् च
शाब्द-बोधैक-कारणम् ।
तद्-विचारोऽत्र सङ्क्षिप्तो
ग्रन्थ-विस्तर-भीरुणा ॥ ३.१२॥

▼ *कृष्णमाचार्यः (En)*

12. Akānksā (mutual expectancy of words) and so on are the means to understand the correct meaning of a sentence. They are not explained here for the fear of bulkiness of the work.

▼ *विश्वास-प्रस्तुतिः*

मुख्यौपचारिकत्वाभ्यां
स **शब्दो** द्विविधो मतः ।
**अभिधा** मुख्यवृत्तिः स्याद्
वृत्तिर् अन्यौपचारिकी ॥ ३.१३॥

▼ *कृष्णमाचार्यः (En)*

13. Words are of two kinds: Mukhya (of primary denotation) and Aupacārika (of secondary denotation). Mukhya is a word that which denotes its natural meaning. Aupacārika is a word other than the Mukhya.

▼ *विश्वास-प्रस्तुतिः*

शरीर-वाचकाः शब्दाः
शरीरि-कृत-वृत्तयः *(=शरीरि-बोधका इति)* ।

सर्व-शब्दैक-वाच्यत्वं
हरेर् इति गदिष्यते ॥ ३.१४॥

▼ *कृष्णमाचार्यः (En)*

14. Words denoting the body, naturally denote also the thing embodied. Therefore Bhagavan Hari is the meaning of every word. This fact will be explained clearly later on.

इति वेदान्तकारिकावल्यां शब्दनिरूपणं तृतीयं प्रकरणम् ।
प्रमाणनिरूपणं समाप्तम् ।

# ०४ प्रकृति-निरूपणम्①

▼ *विश्वास-प्रस्तुतिः*

यत्-प्रमा-विषयं तत् स्यात्
**प्रमेयम्** इति तद् द्विधा ।
द्रव्यम् अद्रव्यम् इत्य्, आद्यं
तद् उपादान-कारणम् ॥ ४.१॥

▼ *कृष्णमाचार्यः (En)*

1. Prameya is that which is the object of Pramā (Valid Knowledge). Prameya is of two kinds : Dravya (Substance) and Adravya (Non-Substance). The former (the Dravya) is that which acts as the material cause to the effect..

▼ *विश्वास-प्रस्तुतिः*

अवस्थान्तर-योगित्वम्
**उपादानत्वम्** उच्यते ।
गुणाश्रयं वा **द्रव्यं** स्यात्
तच् च *(जडत्व-भेदेन)* द्वेधा प्रकीर्तितम् ॥ ४.२॥

▼ *कृष्णमाचार्यः (En)*

2. The material cause is that which undergoes a change in its state. Or, it is Dravya which is the abode of Gunas (Attributes). Dravya is said to be of two kinds : Jada and Ajada.

▼ *विश्वास-प्रस्तुतिः*

अमिश्र-सत्त्व-राहित्यं
**जडत्वम्** अनुगद्यते ।
**जडं** प्रकृति-कालौ द्वौ,
सा सत्त्वादि-गुणत्रया ॥ ४.३॥

▼ *कृष्णमाचार्यः (En)*

3. The Jada is that which is devoid of non-mixed Sattvaguna. Jada is of two kinds : Prakrti and Kala. Prakṛti is that which has the three-fold Guna:- Sattva, Rajas and Tamas.

▼ *विश्वास-प्रस्तुतिः*

**प्रकृतिः** सा क्षराविद्या-
माया-शब्दैर् निगद्यते ।
कार्योन्मुखत्वावस्था
स्याद् **अव्यक्त**-व्यपदेश-भाक् ॥ ४.४॥

1 देशनात् - B.

▼ *कृष्णमाचार्यः (En)*

4. Prakrti is also named as Kşara, Avidyā and Māyā. It is also called Avyakta when it assumes the kinetic state of becoming manifest.

▼ *विश्वास-प्रस्तुतिः*

अव्यक्तान् **महद्**-उत्पत्तिः
सात्त्विकत्वादि-भेदतः ।

**अहङ्कारस्** ततस् त्रेधा
सात्त्विकत्वादि-भेदभाक् ॥ ४.५॥

▼ *कृष्णमाचार्यः (En)*

5. The Mahat comes forth from the Avyakta with three divisions : - Sattvika, Rājasa and Tamasa. The Ahamkara comes forth from Mahat with three divisions:—Sāttvika, Rājasa and Tamasa.

▼ *विश्वास-प्रस्तुतिः*

*(सत्त्व-रजस्-तमो-भेदेन)*
वैकारिकस्, तैजसश् च,
भूतादिर् इति भेदतः ।
नामान्तराणि सन्त्य् एषाम्
अहङ्कारात्मना सताम् ॥ ४.६॥

▼ *कृष्णमाचार्यः (En)*

6. For these three Ahamkaras there are three other names-Vaikarika, Taijasa and Bhutādi respectively.

▼ *विश्वास-प्रस्तुतिः*

तेषु वैकारिकात् सात्त्विकाहङ्काराद् उपस्कृतात् ।
एकादशेन्द्रियाणि स्युर् ज्ञान-कर्मेन्द्रियात्मना ॥ ४.७॥

▼ *कृष्णमाचार्यः (En)*

7. Among these, from the Sāttvikāhamkāra alias Vaikarika, assisted by the Taijasa, the eleven Indriyas (Organs) come forth with two divisions : - Organs of sense and those of action.

▼ *विश्वास-प्रस्तुतिः*

ज्ञान-प्रसरणे शक्तं
**ज्ञानेन्द्रियम्** उदाहृतम् ।
तन्-मनः-श्रोत्र-चक्षुस्-त्वग्-
घ्राण-जिह्वात्मना मतम् ॥ ४.८॥

▼ *कृष्णमाचार्यः (En)*

[[३६]]

8. Those are the sense-organs which have the power of spreading the knowledge. They are considered to be Manas (mind), Srotra (organ of hearing) Caksus (organ of seeing), Tvak (organ of touching), Ghrāna (organ of smelling) and Jihvā (organ of tasting).

▼ *विश्वास-प्रस्तुतिः*

**मनः** स्मृत्य्-आदि-हेतुस् तद्-
बन्ध-मोक्षादि-कारणम् ।*(5)*
शब्द-मात्र-ग्रहे शक्तम्
इन्द्रियं **श्रोत्रम्** उच्यते ॥ ४.९॥

▼ *कृष्णमाचार्यः (En)*

9. Mind is the cause for 'recollection and other mental functions. It also leads to bondage and liberation. The sense-organ which has the power to cognise the sound alone is called S'rotra.

▼ *विश्वास-प्रस्तुतिः*

रूप-मात्र-ग्राहि **चक्षुस्**
**त्वक्** स्पर्श-ग्रह-कारणम् ।
गन्धैक-ग्राहकं **घ्राणं**
**रसनं** रस-भासकम् ॥ ४.१०॥

▼ *कृष्णमाचार्यः (En)*

10. The sense of sight cognises colour alone. The sense of touch is the means for cognising touch. The sense of smell cognises smell alone. The sense of taste cognises taste alone.

▼ *विश्वास-प्रस्तुतिः*

एषां विषय-सम्बन्धः
**संयोगादिः** प्रकीर्तितः ।
उच्चारणादि-कर्मैक-
शक्तं **कर्मेन्द्रियं** मतम् ॥ ४.११॥

▼ *कृष्णमाचार्यः (En)*

11. The contact between these (senses) and their objects is said to be direct conjunction etc. The sense of action is considered to be helpful in the action, utterance of words etc.

▼ *विश्वास-प्रस्तुतिः*

**पञ्चधा** वाक्-पाणि-पाद-
पायूपस्थ-प्रभेदतः ।
वर्णोच्चारण-हेतुर् **वाक्**
**पाणिः** शिल्पादिकारणम् ॥ ४.१२॥

▼ *कृष्णमाचार्यः (En)*

12. They are of five kinds :—the organ of speech, hand, foot, the organ of execretion and that of genera tion. The organ of speech is the cause for the utterance of letters. Hand is helpful for manual work.

▼ *विश्वास-प्रस्तुतिः*

सञ्चार-कारणं **पादः**
**पायुर्** मल-निवृत्तिकृत् ।
**उपस्थः** परमानन्द-
हेतुः स्त्री-पुंसयोर् मतः ॥ ४.१३॥

▼ *कृष्णमाचार्यः (En)*

13. Foot is helpful for (physical) movement. The organ of excretion brings about the removal of excreta. The organ of generation produces great pleasure between a man and a woman.

▼ *विश्वास-प्रस्तुतिः*

राजसाहङ्क्रिया-युक्त-तामसाहङ्कृतेः पुनः ।
जायते शब्द-तन्मात्रादिकं, भूतादिकारणम् ॥ ४.१४॥

▼ *कृष्णमाचार्यः (En)*

14. From the Tamasahamkāra associated with (assisted by) the Rājasahaṁkära are produced the subtle elements of sound etc. which produce the elements and the rest.

▼ *विश्वास-प्रस्तुतिः*

भूतानाम् एव सूक्ष्मैक-
पूर्वावस्था-विशेष-कृत् ।
द्रव्यं **तन्-मात्रम्** इत्य् आहुः
पञ्चधा भूत-पञ्चभिः ... ॥ ४.१५॥

▼ *कृष्णमाचार्यः (En)*

15. It is called Tanmatra (subtle element) which assumes the specific and primary subtle forms of the elements. They are five according as the elements are.

▼ *विश्वास-प्रस्तुतिः*

... तन्-मात्र--पञ्चकं शब्दाद्य्-
आश्रयत्वेन सम्मतम् ।
भूतानां स्याद् उपादानं,
शब्द-तन्मात्रम् आदिमम् ... ॥ ४.१६॥

▼ *कृष्णमाचार्यः (En)*

16 & 17. The five subtle elements are held to be the abodes of the respective qualities. Sound and others and are the inherent causes of the gross elements.

▼ *विश्वास-प्रस्तुतिः*

... स्पर्श-तन्मात्रकं रूप-
रस-तन्मात्रके अपि ।
गन्ध-तन्मात्रम् एतत् *(→तत्-तद्-भूतोपादानं)* स्यात्,
खानिल-ज्योतिर्-अब्-भुवः ... ॥ ४.१७॥

▼ *कृष्णमाचार्यः (En)*

The subtle elements are those of sound, touch, colour, taste and smell. The gross elements are Akasa, air, fire, water and earth.

▼ *विश्वास-प्रस्तुतिः*

... पञ्च भूतानि, तन्मात्र-
स्वरूपं तु निरूप्यते ।
तामसाहङ्कृति-खयोर्
मध्यावस्था-युग् आदिमम्*(→शब्द-तन्मात्रम्)* ... ॥ ४.१८॥

▼ *कृष्णमाचार्यः (En)*

18. The essential nature of the subtle elements is described as following. The first subtle element is in the stage intermediate between Tamasahaṁkāra and Akasa.

▼ *विश्वास-प्रस्तुतिः*

शब्दतन्मात्रम्, अस्माच् च
वियद् उत्पद्यते तथा ।
खम् एव सूर्य-स्पन्देन
दिग् इति व्यपदिश्यते ॥ ४.१९॥

▼ *कृष्णमाचार्यः (En)*

19. It is the subtle element of sound from which is produced the sky (Akāsa). The sky itself is called Dik (directions) due to the movement of the sun.

▼ *विश्वास-प्रस्तुतिः*

द्रव्यं तद् आकाश-वाय्वोर्
मध्यावस्था-सुसंयुतम् ।
**स्पर्श-तन्मात्रम्,** अस्माच् च
वायुर् उत्पद्यते क्रमात् ॥ ४.२०॥

▼ *कृष्णमाचार्यः (En)*

20. The subtle element of touch is in the stage between the sky (Akās/a) and the air. From this is produced the air.

▼ *विश्वास-प्रस्तुतिः*

मध्यावस्था-युतं वायु-
तेजसोर् द्रव्यम् उच्यते ।
**रूप-तन्मात्रम्** इत्य्, अस्मात्
**तेज** उत्पद्यते क्रमात् ॥ ४.२१॥

▼ *कृष्णमाचार्यः (En)*

21. The subtle element of colour is in the stage between air and fire. From this is produced fire.

▼ *विश्वास-प्रस्तुतिः*

मध्यावस्था-युतं तेजः-
पयसोर् द्रव्यम् उच्यते ।
**रस-तन्मात्रम्** इत्य् अस्मात्
**सलिलं** खलु जायते ॥ ४.२२॥

▼ *कृष्णमाचार्यः (En)*

22. The subtle element of taste is in the stage between fire and water. From this water is produced.

[[४२]]

▼ *विश्वास-प्रस्तुतिः*

मध्यावस्था-युतं वारि-
पृथिव्योर् द्रव्यम् उच्यते ।
**गन्ध-तन्मात्रम्** इत्य्, अस्मात्
**पृथिवी** समुदेत्यसौ ॥ ४.२३॥

▼ *विश्वास-प्रस्तुतिः*

आद्यं*(→आकाशः)* शब्दवद्, अन्यच्*(→वायुश्)* च
शब्द-स्पर्शवद् उच्यते ।
रूप-शब्द-स्पर्शवत् स्यात्
तृतीयञ्*(→अग्निः)* च, तुरीयकम्*(→आपः)* …॥ ४.२४॥

▼ *विश्वास-प्रस्तुतिः*

… रूप-शब्द-स्पर्श-रस-
युक्तं, गन्धाधिकं परम्*(→पृठिवी)* ।
तन्मात्र-पञ्चकं भूत-
पञ्चकञ् चैवम् *(क्रमश)* ईरितम् ॥ ४.२५॥

▼ *कृष्णमाचार्यः (En)*

24 & 25. The first subtle element has sound; the next sound and touch; the third colour, sound and touth; the fourth colour, sound, touch and taste and the last has smell in addition (to these). The five Bhutas (gross elements) also are said to be of similar nature.

▼ *विश्वास-प्रस्तुतिः*

एवं प्रकृतिर् अव्यक्त-
महदादि-क्रमाद् भिदाम् ।
चतुर्-विंशति-सङ्ख्यानां
प्रापिता सु-निरूपिता ॥ ४.२६॥

▼ *कृष्णमाचार्यः (En)*

26. Thus Prakrti has been described with its twenty-four manifestations as Avyakta, Mahat and so on.

▼ *विश्वास-प्रस्तुतिः*

*(पञ्चीकरणम्...)*
भूतानि भगवान् सृष्ट्वा
द्वेधैकैकं विभक्तवान् ।
एकम् एकं विधायांशञ्
चतुर्धान्यं विभक्तवान् ॥ ४.२७॥

▼ *कृष्णमाचार्यः (En)*

27. After creating the elements, the Lord divided each of them into two equal parts. Keeping one of the parts unsplit, He split the other into four equal parts.

▼ *विश्वास-प्रस्तुतिः*

चतुर्धा रचितान् अंशांस्
तत्-तद्-अंशे युनक्ति सः ।
चतुर्थांश-युत-स्वांशैः
**पञ्च-भूतान्य् अजीजनत्** ॥ ४.२८॥

▼ *कृष्णमाचार्यः (En)*

28. Then He took the part which was unsplit and had it combined with the other half formed by the combination of the one eighth parts of the other four elements. Thus He created the five gross elements.

▼ *विश्वास-प्रस्तुतिः*

अन्यभूतांश-सत्त्वेऽपि
स्वांश-भूयस्त्वतः कृतः ।
पृथ्व्य्-अप्-तेजो-ऽनिल-व्योम-
**व्यपदेशो** जगत्य् **अभूत्** ॥ ४.२९॥

▼ *कृष्णमाचार्यः (En)*

[[४५]]

29. Each gross element is composed of its own major portion, though each has parts of other elements. Hence the five elements have the respective names as earth, water, fire, air and Ākāsa.

▼ *विश्वास-प्रस्तुतिः*

पञ्चीकरणम् एतादृग्
उपलक्षयति श्रुतिः ।
भूतैर् महद्-अहङ्-कृत्योः
सप्ती-कृतिर् उपस्कृता ॥ ४.३०॥

▼ ***कृष्णमाचार्यः (En)***

30. The Vedic passage purports also this Pañicī- karana (Five-fold combination). When Mahat and Ahamkara also are taken into consideration for the process, then is formed Saptīkarana (Seven-fold combination).

▼ ***विश्वास-प्रस्तुतिः***

भूत-पञ्चकम् अव्यक्तम् एते महद्-अहङ्कृती ।
उपादानानि देहस्य, +इन्द्रियाणि प्रतिपूरुषम् ... ॥ ४.३१॥

▼ ***कृष्णमाचार्यः (En)***

31, 32. The five gross elements together with Avyakta, Mahat and Ahamkara act as the inherent or material cause of the human body. But the Indriyas (senses) possessed by different persons are distinct from each other.

▼ ***विश्वास-प्रस्तुतिः***

भिन्नान्य्, आकल्प-कल्पानि
शरीरं भूषयन्ति हि ।*(5)*
चेतनैक-नियाम्यं यच्
**छरीरं** तन् निगद्यते ॥ ४.३२॥

▼ ***कृष्णमाचार्यः (En)***

They adorn the body like the jewels. That which is invariably controlled by the sentient being is called its body.

▼ ***विश्वास-प्रस्तुतिः***

**शरीरं** द्विविधं - नित्यम्
अनित्यम् इति भेदतः ।
भगवन् नित्य-सूरीणां
**नित्यं** नैसर्गिकं तु तत् ॥ ४.३३॥

▼ ***कृष्णमाचार्यः (En)***

33. Body is of two types-eternal and non-eternal. The Lord and the Nityasūris have the eternal one which is natural to them.

▼ ***विश्वास-प्रस्तुतिः***

**स्** अपि तद् द्वेधा
कर्माकर्म-कृतत्वतः ।
**अकर्म-कृतम्** ईशादेर्
इच्छया परिकल्पितम् ॥ ४.३४॥

▼ ***कृष्णमाचार्यः (En)***

34. The non-eternal one is two-fold according as it is produced and not produced by Karman. That which is not produced by Karman is possessed by the Lord and Nityasūris as contrived at their will.

▼ *विश्वास-प्रस्तुतिः*

तच्च **कर्मकृतं** द्वेधा
**स्वेच्छा-सहकृतं** तथा ।
**कर्म-मात्र-कृतञ्** चेति
*(परिणयकाङ्क्षिण ऋषेः)* सौभर्यादेर् यथा ऽऽदिमम् ॥ ४.३५॥

▼ *कृष्णमाचार्यः (En)*

35. That which is produced by Karman is of two types-produced with the assistance of one's own [[४९]] desire and produced by Karman only. The bodies of the sage Saubhari and other blessed individuals, belong to the former type.

▼ *विश्वास-प्रस्तुतिः*

द्वितीयम् अस्मदादीनां *(कर्ममात्रकृतम्)*
सामान्येन पुनर् द्विधा ।
स्थावरं, जङ्गमञ् चेति,
शिलादि **स्थावरं** मतम् ॥ ४.३६॥

▼ *कृष्णमाचार्यः (En)*

36.

Bodies like those of ours come under the latter type. Again the bodies could be generally classified under two heads of immovable and movable. Stones and similar things are considered immovable.

▼ *विश्वास-प्रस्तुतिः*

**जङ्गमञ्** च द्विधा प्रोक्तं
स्याद् योनिजम् अयोनिजम् ।
**योनिजं** देव-मानुष्य-
तिर्यग्-आदि-विभागवत् ॥ ४.३७॥

▼ *कृष्णमाचार्यः (En)*

37. The movables are two-fold-those born of the womb (Yonija) and not born of the womb (Ayonija). The devine beings, men and animals are Yonijas (viviparous).

▼ *विश्वास-प्रस्तुतिः*

उद्भिज्-ज*(←इतीन्द्रगोप-मण्डूकादय)*-स्वेद-ज*(←यूकामत्कुणादयः)*+अण्डोत्थ*(←पक्ष्यादयः)*-नारक्य्-आख्यम् **अयोनिजम्** ।
एवं पञ्चीकृतानां *(भूतानां)* स्याद् *(ब्रह्म-)*अण्डोत्पादकता स्मृता ॥ ४.३८॥

▼ *कृष्णमाचार्यः (En)*

38. Those which are not born from the womb (Ayonijas) are frog etc. (coming out from the earth), insects and vermin (produced by sweat or warm vapour), born from the eggs and those inhabitant of the hell. It is those which are thus combined in five that are considered to produce the Anda (cosmic Egg).

▼ *विश्वास-प्रस्तुतिः*

अण्डोत्पत्तेः पूर्व-सृष्टिः
**समष्टिर्,** अत उत्तरा ।
**व्यष्टि-सृष्टिर्** इति द्वेधा
सृष्टिर् वेदान्ति-सम्मता ॥ ४.३९॥

▼ *कृष्णमाचार्यः (En)*

39. The creation which precedes the production of the Anda is called the collective creation and the other which follows it is called the distributive creation. This two-fold creation is acceptable to all Vedantins.

▼ *विश्वास-प्रस्तुतिः*

अव्यक्तादेर् महत्त्वादिर्
अवस्थान्तरम् *(इति)* इष्यते ।
विजातीयान्तरावस्था
चेत् तत्त्वान्तरम् ईर्यते ॥ ४.४०॥

▼ *कृष्णमाचार्यः (En)*

40. The manifestation of Avyakta etc. as Mahat etc. is considered to be a condition different from the previous one. If that condition is dissimilar to the previous one, then it is considered to be a different Tattva.

▼ *विश्वास-प्रस्तुतिः*

इत्थम् अव्यक्त-महद्-अहङ्-कारेन्द्रिय-नामकैः । *(←यतिभङ्गः)*
तन्-मात्राणीति तत्त्वानि **चतुर्विंशतिधा** ऽभवन् ॥ ४.४१॥

▼ *कृष्णमाचार्यः (En)*

41. Thus came the twenty-four Tattvas - Avyakta, Mahat, Ahamkāra, Indriyas and Tanmatras.

▼ *विश्वास-प्रस्तुतिः*

भोग्य-भोगोपकरण-
भोग-स्थानानि चेशितुः ।
जीवस्य च प्रकृत्यादीन्य्
**उद्भवन्ति** यथायथम् ॥ ४.४२॥

▼ *कृष्णमाचार्यः (En)*

42. Matter etc. become the objects, means and places of enjoyments for the Lord and the finite souls.

▼ *विश्वास-प्रस्तुतिः*

विषयो **भोग्यम्,** अक्ष्यादि
**भोगोपकरणं** मतम् ।
**भोग-स्थानं** तु भुवनं
तद्-वर्तीन्य् अण्ड-जानि हि ॥ ४.४३॥

▼ *कृष्णमाचार्यः (En)*

43. Bhogya is the object. Eye etc. are considered as the means of enjoyment. The world and those contained therein are places of enjoyment.

▼ *विश्वास-प्रस्तुतिः*

एवं पञ्चीकृतैर् भूतैर्
आरब्धं **प्राकृतं** भवेत् ।
कपित्थ-फलकाकारम्
**अण्डं** नाम निगद्यते ॥ ४.४४॥

▼ *कृष्णमाचार्यः (En)*

44. The material world is thus envolved out of the five-fold elements. Anda is in the form of wood-apple (Kapittha).

▼ *विश्वास-प्रस्तुतिः*

**जम्बू-द्वीपम्** इदं सर्वं
लवणोदधिना ऽऽवृतम् ।
**प्लक्ष-द्वीपं** ततो ऽपीक्षु-
समुद्रेण प्रवेष्टितम् ॥ ४.४५॥

▼ *कृष्णमाचार्यः (En)*

45. This whole Jambudvipa is encircled by the salt ocean. Beyond this, there is Plakṣadvipa with the sea of sugar-cane juice.

▼ *विश्वास-प्रस्तुतिः*

ततस्तु **शाल्मलि-द्वीपं**
सुरा-सागर-वेष्टितम् ।
**कुश-द्वीपं** ततः सर्पिः-
समुद्रेण प्रवेष्टितम् ॥ ४.४६॥

▼ *कृष्णमाचार्यः (En)*

46. Then there is S'almalidvipa with the sea of wine. Then there is Kusadvipa with the sea of clarified butter.

▼ *विश्वास-प्रस्तुतिः*

**क्रौञ्चद्वीपं** ततः पश्चाद्
दध्य्-अर्णव-समावृतम् ।
**शाक-द्वीपं** ततः क्षीर-
समुद्रेण प्रवेष्टितम् ॥ ४.४७॥

▼ *कृष्णमाचार्यः (En)*

47. Then there is Krauñicadvīpa with the sea of curds and then S'akadvipa with the sea of milk.

▼ *विश्वास-प्रस्तुतिः*

**पुष्कर-द्वीपम्** अभितः
शुद्धाम्बुधि-समावृतम् ।
सर्वम् एतद् **+हैमभूम्या**
ततो **वलय-पर्वतः** ॥ ४.४८॥

▼ *कृष्णमाचार्यः (En)*

48. Then there is Puşkaradvipa encircled by the sea of fresh water. All these are encircled by the golden land. Then there is a circle-shaped mountain.

▼ *विश्वास-प्रस्तुतिः*

**अन्धकारावृतः** सोऽपि
सोऽपि **गर्भोदकेन** च ।
ततो **ऽण्डम्** एकम् एवं
स्याद् भूमेर् ऊर्ध्वम् अधोऽपि च ॥ ४.४९॥

▼ *कृष्णमाचार्यः (En)*

49. It is encircled by darkness, that too by Garbhodaka. Anda is thus only one which is above and below the earth.

▼ *विश्वास-प्रस्तुतिः*

अण्डान्य् एतादृशानि स्युर्
अनन्तानि महाहरेः ।
जल-बुद्बुद-कल्पानि
पुराणोक्तान्य् अनुक्रमात् ॥ ४.५०॥*(5)*

▼ *कृष्णमाचार्यः (En)*

50. Endless (countless) are the Andas of the Great Hari. They are like bubbles of water. They have been enumerated in the order in the Purāṇas.

इति वेदान्तकारिकावल्यां प्रकृतिनिरूपणं चतुर्थे प्रकरणम्

1128 | Pizin

451

# ०५ काल-निरूपणम्①

▼ *विश्वास-प्रस्तुतिः*

गुण-त्रय-विहीनो यः
स जडः **काल** उच्यते ।
अ-खण्ड--खण्ड-भेदेन
स कालो द्विविधो मतः ॥ ५.१॥

▼ *कृष्णमाचार्यः (En)*

1. Time is said to be Jada (an inert substance) devoid of the triad of Guṇas. It is of two kinds: Akanda (Undivided) and Kanda (Divided).

▼ *विश्वास-प्रस्तुतिः*

आद्यो *(→अखण्डकालः)* विभुर् भूत-भावि-
वर्तमानत्व-धी-करः ।
निमेषादि-प्रभेदेन
बहुभेदस् त्वसौ *(खण्डकालो)* मतः ॥ ५.२॥

▼ *कृष्णमाचार्यः (En)*

2. The former is Vibhu (all pervading). It gives rise to the cognition as per past, future and present and has also many divisions as Nimeṣa and so on.

▼ *विश्वास-प्रस्तुतिः*

अ-खण्ड-काल एवायं
**नित्य** इत्यवगम्यते ।
कालः *(निमेषादि-)*स्व-कार्यं प्रति तु
स्याद् उपादान-कारणम् ॥ ५.३॥

▼ *कृष्णमाचार्यः (En)*

3. The undivided Time is known to be Nitya (eternal). It acts as Upādāna (material cause) for its various manifestations (as Nimesa etc.).

▼ *विश्वास-प्रस्तुतिः*

*(सावधित्वान् निमेषादि-)*कार्य-रूपस् ततो नैव
नित्य इत्य् अवधार्यताम् ।
लीला-विभूताव् ईशानः
कालम् आलम्ब्य कार्य-कृत् ॥ ५.४॥

▼ *कृष्णमाचार्यः (En)*

4. Hence, the effected Time is Anitya, (non- eternal). The Lord in His sportive sphere functions as dependent on Time.

▼ *विश्वास-प्रस्तुतिः*

एष नित्य-विभूतौ तु
न कालम् *(तत्र वर्तमानम् अप्य्)* अवलम्बते ।
**क्रीडा-परिकरः** सोऽयं
कालस् तु परमात्मनः ॥ ५.५॥

▼ ***कृष्णमाचार्यः (En)***

5. But in His eternal sphere He functions not dependent on Time. But Time serves as an instrument in his sport.

▼ ***विश्वास-प्रस्तुतिः***

नित्य-नैमित्तिक--प्राकृत-लयाः कालहेतुकाः । *(यतिभङ्गः)*
एवं प्रकाशितं काल-स्वरूपस्य निरूपणम् ॥ ५.६॥

▼ ***कृष्णमाचार्यः (En)***

6. The Pralaya (Dissolution) which is known of three kinds namely Nitya (frequent), Naimittika (occasional) and Prākrta (material) is subject to Time. Thus the nature and characteristics of Time have been explained.

इति वेदान्तकारिकावल्यां कालनिरूपणं पञ्चमं प्रकरणम्

# ०६ नित्य-विभूति-निरूपणम्①

▼ *विश्वास-प्रस्तुतिः*

शुद्ध-सत्त्वे धर्म-भूत-
ज्ञान--जीवेश्वरेषु च ।
**अजडत्वं** भवेल् लक्ष्म
तत् पुनः स्व-प्रकाशता ॥ ६.१॥

▼ *कृष्णमाचार्यः (En)*

1. Ajadatva (Being other than Jada or inert) is the common characteristic of S'uddhasattva (The substance of pure Sattvaguna), Dharmabhutajñāna (Attributive knowledge), Jiva and Iśvara. Ajaḍatva is nothing but Svayamprakaśatā (Self-luminosity).

▼ *विश्वास-प्रस्तुतिः*

पराक्त्वे सत्य् अजडता
लक्ष्म प्रथमयोर् *(शुद्ध-सत्त्व--धर्म-भूत-ज्ञानयोः)* मतम् ।
परस्मै भासमानत्वं
**पराक्त्वम्** इति गद्यते ॥ ६.२॥

▼ *कृष्णमाचार्यः (En)*

2. Parāktva (Being the object of the knowledge of others only) along with Ajaḍatva is the common characteristic of the first two categories (S'uddhasattva and Dharmabutajñāna). Parāktva is defined as the state of being knowable for others only.

▼ *विश्वास-प्रस्तुतिः*

सत्त्वैक-मूर्तिको देशः
**शुद्ध-सत्त्वम्** अचेतनम्।
परिच्छिन्नम् अधो-देशे
ऽनन्तम् ऊर्ध्वप्रदेशतः ॥ ६.३॥

▼ *कृष्णमाचार्यः (En)*

3. S'uddhasattva is a non-sentient substance full of pure Sattva guna (ie., not mixed with Rajas and Tamas). It is limited downward and unlimited upward.

▼ *विश्वास-प्रस्तुतिः*

स्वयम्-प्रकाशरूपेयं
*("पर"-शब्द-सहित-)*पञ्चोपनिषद्*(→अप्राकृत-पञ्च-भूत)*-आत्मिका ।*(5)*
विष्णोर् नित्य-विभूतिः स्यान्
नित्यम् आनन्द-रूपिणी ॥ ६.४॥

▼ *कृष्णमाचार्यः (En)*

4. This kind of substance is formed with divine elements described in the hymns of Pañcopanisad. This is the Eternal Wealth of the Lord Visṇu and is in the form of Ananda ( Bliss).

▼ *विश्वास-प्रस्तुतिः*

सेयं विभूतिर् ईशस्य
नित्य-मुक्तात्मनाम् अपि ।

भोग्य-भोगोपकरण-
भोग-स्थानमयी मता ॥ ६.५॥

▼ *कृष्णमाचार्यः (En)*

5. This eternal substance is considered to have assumed different forms of the objects of enjoyment, the means of enjoyment and the places of enjoyment of the Lord Iśvara, the Nityas (Eternal souls) and Muktas (Released souls ).

▼ *विश्वास-प्रस्तुतिः*

**भोग्यम्** ईश्वर-देहादि
द्वितीयं*(→ भोगोपकरणम्)* चन्दनादिकम् ।
**भोग-स्थानं** तु माणिक्य-
गोपुरादिकम् उच्यते ॥ ६.६॥

▼ *कृष्णमाचार्यः (En)*

6. The objects of enjoyment are the Lord's body and so on. The means of enjoyment are Candana (sandal) etc. The places of enjoyment are the towers of precious gems and so on.

▼ *विश्वास-प्रस्तुतिः*

देहा ईश्वर-नित्यानां
नित्येच्छा-कल्पिता हरेः ।
मुक्तानां तु शरीरादिस्
तत्-सङ्कल्प-कृतो मतः ॥ ६.७॥

▼ *कृष्णमाचार्यः (En)*

7. The bodies of the Lord and Nityas take their form on the eternal wish of the Lord Hari.

But those of Muktas are brought about by His (Lord's) Saṁkalpa (Will).

▼ *विश्वास-प्रस्तुतिः*

श्रीपतेर् व्यूह-विभवार्चावतारतया सतः ।
अ-प्राकृत-शरीराणि प्रतिष्ठानन्तरं हरेः …॥ ६.८॥

[[६४]]

▼ *विश्वास-प्रस्तुतिः*

प्रसादोन्मुखतापत्तौ
**प्रकटानि भवन्ति** हि ।
तच् च प्रकटनं तस्य
**सङ्कल्पाधीनम्** ईर्यते ॥ ६.९॥

▼ *कृष्णमाचार्यः (En)*

8 and 9. The bodies possessed by the Lord of S'ri in his various incarnations as Vyuha, Vibhava and Arcă are of the non-material and eternal substance. In the case of Arca the non-materiality of the image appears immediately after the performance of Pratiṣṭhā (consecration) when the Lord becomes graceful.

६५

This state of thing happens only on His divine Will (Samkalpa).

▼ *विश्वास-प्रस्तुतिः*

प्राकृताप्राकृत-तनु-
संसर्गः कथम् इत्य् *(चेत्)* - अलम् ।
रामकृष्णावतारादौ
दृष्टत्वात् तस्य भूयसा ॥ ६.१०॥

▼ *कृष्णमाचार्यः (En)*

10. The objection, viz.-how can there be a contact between the non-material body and material world?-is not sound, because such a contact is often proved in the case of the Lord's incarnations such as Rāma, Krsna and so on.

▼ *विश्वास-प्रस्तुतिः*

औज्ज्वल्यादिगुणा ये स्युर्
दिव्य-मङ्गल-विग्रहे ।
हरेस्, तांस् तु विजानीहि
गद्य-त्रय-विचारतः ॥ ६.११॥

▼ *कृष्णमाचार्यः (En)*

11. The excellence of brilliancy etc. in the divine body of the Lord Hari, should be understood fully by referring to the work Gadyatraya.

[[६६]]

▼ *विश्वास-प्रस्तुतिः*

मुक्तानाम् अशरीरत्व-
वचनं यत्तु दृश्यते ।
तत्-कर्म-कृत-शारीर-
सम्बन्धाभाव-गोचरम् ॥ ६.१२॥

▼ *कृष्णमाचार्यः (En)*

12. The statement that the Muktas have no body, should mean the absence of such body as caused by Karman.

▼ *विश्वास-प्रस्तुतिः*

निरूपयन्ति श्रीनाथ-
दिव्य-मङ्गल-विग्रहम् ।
पुराणोक्त-क्रमाद् अस्माद्
आद्या वेदान्त-देशिकाः ॥ ६.१३॥

तथाहि-

> "चेतश् चक्रति, चेतना*(=ज्ञानम्)* ऽसिर्; अमतिस् तत्*(=खड्गस्य)*-संवृतिर्, मालिका
> भूतानि स्व-गुणैर्, *(सात्त्विक-तामस+)*अहं-कृति-युगं शङ्खेन शार्ङ्गायते । बाणाः खानि*(=ज्ञानकर्मेन्द्रियाणि)* दशापि, कौस्तुभमणिर् जीवः, प्रधानं पुनः
> श्रीवत्सं, कमलापते, तव गदाम् **आहुर्** महान्तं बुधाः ॥"

इति ।

▼ *कृष्णमाचार्यः (En)*

13. Our revered and ancient Acāryas in Vedanta explain the blissful body of the Lord of Sri thus as said in Purāna : "O Lord of Kamalā, the sense of mind is your disc, knowledge is your sword, ignorance is your sheath, the elements with their gunas are your garland, the two-fold Ahamkaras are your S'ankha (conch) and Sarnga (bow), the ten senses are your arrows, Jivatattva is your Kaustubha Gem, the Prakṛti is your Sri-Vatsa mole, and the Mahat is your Gadā (club)."

▼ *विश्वास-प्रस्तुतिः*

त्रिपाद्-विभूति--वैकुण्ठ-
पर-व्योमादि-शब्दिता ।
विभूतिर् इयम् ईशस्य
महती सुमहीयते ॥ ६.१४॥

▼ *कृष्णमाचार्यः (En)*

14. This Nityavibhūti (Eternal Wealth) is of great excellence and mentioned with different names such as This also Tripādvibūti, Vaikuntha, Paravyoman etc. belongs to the Lord. It is vast and honoured by all with great reverence.

[[६८]]

▼ *विश्वास-प्रस्तुतिः*

द्वादशावरणोपेतम्
अनेक-शत-गोपुरम् ।
वैकुण्ठं नाम नगरम्
एतस्यां प्रविजृम्भते ॥ ६.१५॥

▼ *कृष्णमाचार्यः (En)*

15. In this world shines an extensive celestial city called Sri-Vaikuntha with 12 enclosures and many hundreds of towers.

▼ *विश्वास-प्रस्तुतिः*

आनन्दनामकस् तत्र
सुदिव्यनिलयः स्फुटः ।
तत्र रत्नमय-स्तम्भ-
सहस्रा भासते सभा ॥ ६.१६॥

▼ *कृष्णमाचार्यः (En)*

16. In this city exists a huge divine mansion called Ananda. In that mansion shines a beautiful Assembly Hall with thousand pillars made of gems.

▼ *विश्वास-प्रस्तुतिः*

अनन्तस् तत्र च फणा- मणि-तेजो-विराजितः ।
तस्मिन् *(→अनन्ते)* धर्मादि*(पाद-)*-सहित-
सिंहासनम् उपस्थितम् ॥ ६.१७॥

▼ *कृष्णमाचार्यः (En)*

17. In this Hall is seen Ananta, brilliant with the luster of gems of his hoods. There is on him a throne (Simhasana) attended by Dharma and other attendants.

▼ *विश्वास-प्रस्तुतिः*

तत्र चामरवद्-धस्तैर्
विमलादिभिर् अर्चितम् ।
पद्मम् अष्ट-दलं भाति
तत्र शेषोऽस्ति धीमयः ॥ ६.१८॥

▼ *कृष्णमाचार्यः (En)*

18. In it is seen a lotus flower with 8 petals worshipped by Vimala and other maid attendants with chowries in their hands. There is on the lotus, S'eşa who is an embodiment of intellect.

७०

▼ *विश्वास-प्रस्तुतिः*

तत्रानन्दमयः साक्षात्
सर्व-वाचाम् अगोचरः ।
अद्भुत-ज्योतिर्-आकारो
भाति नारायणात्मना ॥ ६.१९॥

▼ *कृष्णमाचार्यः (En)*

19. There shines pre-eminently a wonderful Light in the form of Sriman-Nārāyaṇa who is the eternal Bliss and beyond the scope of all speech.

इति वेदान्तकारिकावल्यां नित्यविभूतिनिरूपणं षष्ठं प्रकरणम्

# ०७ धर्मभूतज्ञान-निरूपणादि①

## ज्ञानम्②

▼ *विश्वास-प्रस्तुतिः*

धर्मो भवति यज् ज्ञानं
प्रभा दीपे *(तेजस् तेजसि)* यथात्मनोः *(धर्मी-भूत-ज्ञानयोः जीवेश्वरयोः)*।
तद् धर्म-भूत-विज्ञानं,
*(तत्)* नित्यं नित्येश्वरेषु तत् ॥ ७.१॥

▼ *कृष्णमाचार्यः (En)*

[[७३]]

1. Knowledge which is an essential quality of the Atmans (Individual and Supreme) is called Dharmabhuta-jñana (Attributive Knowledge). It is eternal in Nityas (Eternal souls) and Isvara (The Lord).

▼ *विश्वास-प्रस्तुतिः*

बद्धेषु तत् तिरोभूतं
मुक्तेषु प्राक्-तिरोहितम् ।
सङ्कोचन-विकासाभ्यां
नाशोत्पत्ति-विपाक-भाक् ॥ ७.२॥

▼ *कृष्णमाचार्यः (En)*

2. In respect of those who are under bondage. it (Knowledge) is concealed. In respect of those who are freed from bondage it was formerely concealed. Knowledge is said to be the subject of loss and production, because of its contraction and expansion.

▼ *विश्वास-प्रस्तुतिः*

सङ्कोच *(शरीर-प्राप्त्या)* इन्द्रिय-द्वारा *(विषयम् प्रति निर्गत्य)*
ज्ञानं सङ्कोच्यते यदि ।
विकास इन्द्रिय-द्वारा
ज्ञान-प्रसरणाद् भवेत् ॥ ७.३॥

▼ *कृष्णमाचार्यः (En)*

3. Contraction of knowledge happens when it becomes shrunk due to the contact with the senses. Its expansion takes place when it becomes expanded due to the contact with the senses.

10

▼ *विश्वास-प्रस्तुतिः*

*(स्व-निरूपित-विषयताकम्, स्व-गोचर-ज्ञानान्तरानपेक्षं इति)*
*(ज्ञानं)* स्व-प्रकाशं, स्वतो-मानम् *(परतो ऽप्रामाण्यम्)*
एतद् इत्य्-अत्र सम्मतम् ।
स्वान्य-निर्वाहकत्वेन *(→पर-प्रकाशतया सह)*
दीपवत् स्व-प्रकाशता ॥ ७.४॥

▼ *कृष्णमाचार्यः (En)*

4. In this system, it (knowledge) is held as selfluminous and self-valid. Its self-luminosity is due to the fact that it reveals itself as well as other objects just as the light.

▼ *विश्वास-प्रस्तुतिः*

तमो-विशेष-सान्निध्याज्
ज्ञानं स्वापे तिरोहितम् ।
द्रव्यत्वम् अस्य ज्ञानस्य
प्रभावद् गुणतापि च ॥ ७.५॥

▼ *कृष्णमाचार्यः (En)*

5. During sleep, knowledge (of men) is eclipsed by the vicinity of Tamas. Knowledge is considered as both a substance and quality like the rays (of the sun).

▼ *विश्वास-प्रस्तुतिः*

धी*(=ज्ञान)*-भेदाः सुख-दुःखेच्छा-
द्वेष-यत्ना, न ते पृथक् ।
द्वेष्मीच्छामीति वादस् तु
स्मरामीत्य्-आदिवन् मतः ॥ ७.६॥

▼ *कृष्णमाचार्यः (En)*

6. Happiness, sorrow, desire, enmity, effort etc., are only the various manifestations of knowledge and not different from it. The usage as 'I hate, I desire ' etc., must be considered like 'I recollect' etc.

▼ *विश्वास-प्रस्तुतिः*

स्मृत्यादयो ज्ञान-भेदा
अनन्ता **जीव-वृत्तयः***(→गुणाः/धर्माः)* ।
ज्ञान-शक्त्योर् विततयो *(→सौशील्य-वात्सल्यादयः, स्थैर्य-शौर्यादयः)*
ऽनन्ताश् च भगवद्-गुणाः ॥ ७.७॥

▼ *कृष्णमाचार्यः (En)*

7. Recollection and other manifestations of the knowledge resting on jiva are endless. The numerous qualities of the Lord are the different forms of His knowledge and power.

▼ *विश्वास-प्रस्तुतिः*

गद्य-त्रये महाचार्यैर्
अयम् अर्थ उदीरितः ।
तत्-तत्-स्वरूप-विज्ञानं
तद्भाष्येणावगम्यते ॥ ७.८॥

▼ *कृष्णमाचार्यः (En)*

8. The facts mentioned above have been disclosed by the Great Acarya (Sri Rāmānuja) in his Gadyatraya. A clear understanding of the characteristics of these qualities is gained from the commentary thereon.

# भक्ति-प्रपत्ती②

▼ *विश्वास-प्रस्तुतिः*

भक्ति-प्रपत्ति-सुप्रीत
ईश्वरो मुक्ति-दायकः ।
अतो भक्ति-प्रपत्ती हि
मुक्तौ परम-कारणम् ॥ ७.९॥

▼ *कृष्णमाचार्यः (En)*

9. The Lord grants final liberation (to men), when He is well pleased by the means of Bhakti (Uninterrupted meditation with love) or Prapatti (Unconditional Self-Surrender). Therefore Bhakti and Prapatti alone are the principal means for the attainment of Mukti.

▼ *विश्वास-प्रस्तुतिः*

कर्म-योग--ज्ञान-योगौ
भक्तौ साधनम् ऊचिरे ।
फलाभिसन्धि-रहितं
*(यज्ञादि स्वकर्तव्यान्तं)* कर्म+आराधनम्*(→योग)* ईशितुः ॥ ७.१०॥*(5)*

▼ *कृष्णमाचार्यः (En)*

10. Karma-yoga and Jñāna-yoga are said to be the means of Bhakti-yoga. The ritual worship of the Lord without any regard for its fruits is called Karma- yoga.

▼ *विश्वास-प्रस्तुतिः*

विनिर्मलान्तःकरणे *(स्वात्मनि)*
चिन्तनं **ज्ञान-योगकः** ।
साक्षाद् इतरथा *(→कर्म-योगे ज्ञान-योगापेक्षया, तद्विपरीततया)* वापि
**भक्तौ कारणता** ऽनयोः ॥ ७.११॥

▼ *कृष्णमाचार्यः (En)*

11. The meditation (on the Self) with a stainless mind is called Jñana-yoga. These two Yogas directly or indirectly are the means of Bhakti-yoga.

▼ *विश्वास-प्रस्तुतिः*

**भक्तियोगो** ऽयम् अष्टाङ्गो
ऽविच्छिन्ना स्मृतिसन्ततिः ।
विवेकादिभिरुत्पाद्या
दर्शनाकारतां गता ॥ ७.१२॥

▼ *कृष्णमाचार्यः (En)*

12. The uninterrupted stream of meditation (on the Lord) which is practised with its eight-fold auxiliaries and developed by the application of Viveka and other disciplines so as to reach the state on a par with direct intuition, is called Bhakti-yoga.

▼ *विश्वास-प्रस्तुतिः*

तत्-तच्-छरीरावसान-
समये परिणामिनी ।
सेयं **साधन-भक्तिः** स्यात्
प्रपत्त्य्-अङ्गवती मता ॥ ७.१३॥

▼ *कृष्णमाचार्यः (En)*

13. This Yoga will grow ripe at the end of the material body. This is called Sadhanabhakti (Bhakti as the means). It requires Prapatti (Self -Surrender) as its auxiliary.

▼ *विश्वास-प्रस्तुतिः*

*(प्रपत्ति-योग-रूपा)* **फल-भक्तिस्** तु भगवद्-
अनुग्रह-कृता भवेत् ।
अत एव हरिः साक्षात्
सिद्धोपायत्वम् अश्नुते ॥ ७.१४॥

▼ *कृष्णमाचार्यः (En)*

14. But Phalabhakti (Bhakti as the effect) takes place only by the grace of the Lord. Hence, Hari occupies the place of the direct and self-accomplished means.

८२

▼ *विश्वास-प्रस्तुतिः*

अन्तर्-आदित्य-विद्यादि-
भेदात् सा *(साधन-भक्तिः, न साध्य-भक्तिः)* बहुधा मता ।
सर्वापि ब्रह्म-विद्येयं
ब्रह्म-प्राप्त्य्-उपयोगिनी ॥ ७.१५॥

▼ *कृष्णमाचार्यः (En)*

15. It is considered to be of various kinds due to the division as Antarādityavidya and so on. All these Brahmavidyas are helpful in attaining the Brahman.

▼ *विश्वास-प्रस्तुतिः*

न्यासविद्या **प्रपत्तिः** स्याद्
अङ्गपञ्चक-योगिनी ।
आनुकूल्यस्य सङ्कल्पः,
प्रातिकूल्यस्य वर्जनम् ॥ ७.१६॥

▼ *विश्वास-प्रस्तुतिः*

रक्षिष्यतीति विश्वासो,
गोप्तृत्व-वरणं तथा ।
आत्म-निक्षेप--कार्पण्ये
**अङ्ग-पञ्चकम्** ईरितम् ॥ ७.१७॥

▼ *कृष्णमाचार्यः (En)*

16 & 17. Nyāsavidyā is the Prapatti (Self-surrender to God) which has five-fold auxiliaries-namely - determination to be always agreeable to the Lord and His devotees, abstaining from hostility towards them, faith as 'He will surely save me', seeking Him [[८४]] as the saviour, surrendering one's self to Him, and helplessness.

▼ *विश्वास-प्रस्तुतिः*

गुरूपसदनाद् एषा विज्ञातव्या मनीषिभिः ।
इयम् उत्तर-पूर्वाघाश्लेष-नाशकृद् उच्यते ॥ ७.१८॥

▼ *कृष्णमाचार्यः (En)*

18. Men of intellect should know fully about this, by sitting at the feet of the teacher. It is said that this (Prapatti) will effect the non-connection with future sins and the destruction of past sins.

▼ *विश्वास-प्रस्तुतिः*

अपचारान् विना ब्रह्म-
विदां नास्या विरोधकृत् ।
अन्योऽस्तीति महाचार्य-
शासनं व्यवसीयते ॥ ७.१९॥

▼ *कृष्णमाचार्यः (En)*

19. Except the offence to Brahmavedins (knowers of Brahman) there is nothing which can resist the Prapatti from functioning. This is the decision contained in the teaching of great Acaryas.

इति वेदान्तकारिकावल्यां धर्मभूतज्ञाननिरूपणं सप्तमं प्रकरणम्

# ०८ जीव-निरूपणम्①

▼ *विश्वास-प्रस्तुतिः*

अणुत्वे सति चैतन्यं
**जीव**-लक्षणम् उच्यते ।
स च देहेन्द्रियादिभ्यो
विलक्षणतया मतः ॥ ८.१॥

▼ *कृष्णमाचार्यः (En)*

1. Minuteness and consciousness jointly constitute the characteristic of the Jiva. He is held to be distinct from his body, senses etc.

▼ *विश्वास-प्रस्तुतिः*

जीवस्यानेक-**विषयानु-**
**भवो** ऽणोर् अपि स्मृतः ।
यद्-धर्म-भूत-विज्ञान-
व्याप्तिस् तत्रोपयोगिनी ॥ ८.२॥

▼ *कृष्णमाचार्यः (En)*

2. Though Jiva is subtle, his experience of different objects, is accountable to the expansion of his knowledge.

▼ *विश्वास-प्रस्तुतिः*

पूर्वानुभूत-विषय--
प्रति-सन्धान-योगतः ।
**नित्यः**, प्रतिशरीरं स
**भिन्नो** भोक्त्रादि-शब्दितः ॥ ८.३॥

▼ *कृष्णमाचार्यः (En)*

3. He is permanent because of his recollection on the objects formerely experienced. The Jivas dwelling in different bodies are individually different and called as Bhoktr (enjoyer) etc.

▼ *विश्वास-प्रस्तुतिः*

*(जीवः)* प्रकृत्य*(→प्राकृत-देह)*-अपेक्षया देही,
*(तन्नियाम्यत्व--तद्-आधारत्वादिभिः)* देहः श्रीमद्*(-वुष्णव्)*-अपेक्षया ।
तस्य **स्वयं-प्रकाशत्वं**
*("अत्रायं पुरुषः स्वयंज्योतिर् भवति " इत्यादि-)*प्रत्यक्ष*(=स्पष्ट)*--श्रुति--बोधितम् ॥ ८.४॥

▼ *कृष्णमाचार्यः (En)*

4. He is the soul in respect of his body.
   He is the body in respect of the Lord of Sri.
   That he is self-luminous is taught by clear Sruti passages.

▼ *विश्वास-प्रस्तुतिः*

*(नैक-शरीरक-सौबरि-वत्)* देशान्तर-फलादीनाम्
उपलब्धिर् अणोर् अपि ।

कर्म-जन्याद् अ-दृष्टाऽप्य-
*(धर्म-भूत-ज्ञान-प्रसरात्मक-)*विज्ञानाद् इति सञ्जगुः ॥ ८.५॥

▼ *कृष्णमाचार्यः (En)*

5. Wise men say that though he is atomic, his experience of the objects in different places, is accountable to his knowledge which extends by virtue of his Karman.

▼ *विश्वास-प्रस्तुतिः*

बद्धो मुक्तो नित्य इति
**जीवः** स त्रिविधो मतः ।
ब्रह्मादि-स्तम्ब*(=तृणादि)*-पर्यन्ता
**बद्धाः** संसार-योगिनः ॥ ८.६॥

▼ *कृष्णमाचार्यः (En)*

[[९०]]

6. The Jivas are of three kinds - Fixed in bondage, Released and Eternal. Of these those fixed in bondage are connected with Samsara (transmigration) and include all Jivas from Brahman (the creator) to small insects.

▼ *विश्वास-प्रस्तुतिः*

त्रैवर्गिकार्थ-निष्णाता
**बुभुक्षव** उदाहृताः ।
**अर्थ-काम-परास्** तत्र
स्वदेहात्माभिमानिनः ॥ ८.७॥

▼ *कृष्णमाचार्यः (En)*

7. Those are Bubhuksus (desirous of worldly enjoyments) who are longing for Dharma, Artha and Kama. Of these those who wrongly think that the body is the self are called Arthakāmapara (devoted to wealth and passion).

▼ *विश्वास-प्रस्तुतिः*

ते तु **धर्म-परास्** तत्र
यागाद्य्-अर्थानुषङ्गिणः ।
**धर्मस्** त्व् अलौकिक-श्रेयः-
साधनं चोदनोदितम् ॥ ८.८॥

▼ *कृष्णमाचार्यः (En)*

8. But those who are engaged in performing various sacrifices are called Dharmaparas (devoted to [[९१]] Dharma). That is Dharma which is ordained by the Vedic injunction as the means of heavenly pleasure.

▼ *विश्वास-प्रस्तुतिः*

रुद्राद्याराधन-परा
**अन्य-देव-परा** मताः ।
आर्तो*(=अनुभूत-भ्रष्टैश्वर्य-कामः)*, *(आत्म-स्वरूप-ज्ञान-मात्र-)*जिज्ञासुर्, अर्थार्थीत्य्
एवं **भागवताः** स्मृताः ॥ ८.९॥

▼ *कृष्णमाचार्यः (En)*

9. Those who worship the other deities Rudra and so on are called Anyadevaparas (devotees of other gods). The Bhagavatas are those who worship Bhagavan Viṣṇu alone. They are of three kinds- Arta (distressed) Jijñāsu (desirous of getting Jñānai.e. self) and Arthārthin (ambitious in getting wealth).

▼ *विश्वास-प्रस्तुतिः*

मुमुक्षूणां च **कैवल्य-**
**पराणां** लक्ष्म कथ्यते ।
प्रकृतेस् तु वियुक्तस्य
स्वात्मनोऽनुभवः परम् ॥ ८.१०॥

▼ *कृष्णमाचार्यः (En)*

10. Now the characteristics of the Mumuksus (ambitious for the Eternal Bliss) and Kaivalyaparas (desirous of being aloof from material connection) are described. Kaivalya is the enjoyment of one's own self after the release from material connection.

▼ *विश्वास-प्रस्तुतिः*

कैवल्यम् अर्चिर्-मार्गेण
गत्वापि परमं पदम् ।
रमण-त्यक्त-पत्नीवत्
क्व-चित्-कोणे ऽवतिष्ठते ॥ ८.११॥

▼ *कृष्णमाचार्यः (En)*

11. Even on reaching the Highest Region (Paramapada) through the path of Arcis (Light) etc., they remain in a corner of that Region like a beloved wife on separation from her lover.

▼ *विश्वास-प्रस्तुतिः*

कैवल्यम् एतत् केषाञ्चिद्
आर्याणाम् एव *(मोक्षत्वेन)* सम्मतम् ।
अस्मद्-आर्यास् तु कैवल्यं
न *(मोक्षत्वेन)* मन्यन्त इति स्थितम् ॥ ८.१२॥

▼ *कृष्णमाचार्यः (En)*

12. This state of Kaivalya is acceptable only to some of our philosophers. But our preceptors do not accept Kaivalya (as Mukti). This is their conclusion.

▼ *विश्वास-प्रस्तुतिः*

**भक्ताः** पूर्वोक्त-भक्त्यैव
मुक्ति-सम्प्राप्त्य्-अपेक्षिणः ।
अपशूद्र-नये भक्तौ
शूद्रानधिकृतिः स्फुटा ॥ ८.१३॥

▼ *कृष्णमाचार्यः (En)*

13. Bhaktas (engaged in Bhaktiyoga) are eager to reach Mukti (Eternal Bliss) by the means of Bhakti- yoga (Devotional meditation) as described before. From the rule of Apaśudradhikarana of the Brahma- sūtra, it is evident that S'ūdras are not qualified for Bhaktiyoga.

▼ *विश्वास-प्रस्तुतिः*

साध्य-साधन-भक्तिभ्यां
**भक्ताः** स्युर् द्वि-विधा मताः ।
पराङ्कुशादिकान् आद्यान्
व्यासादीन् अपरान् विदुः ॥ ८.१४॥

▼ *कृष्णमाचार्यः (En)*

14. Bhaktas are of two kinds because of the two- fold division of Bhakti as Sadhya and Sadhana (effect and means). The former group includes Parankuśa and others while the latter Vyasa and others.

▼ *विश्वास-प्रस्तुतिः*

मुमुक्षवः **प्रपन्नाश्** चाकिञ्चन्यादिक-योगिनः ।
त्रैवर्गिक-परा, मोक्ष-पराश् चेति च ते *(→ प्रपन्ना)* द्विधा ॥ ८.१५॥

▼ *कृष्णमाचार्यः (En)*

15. Among the Mumukşus (desirous of Moksa) Prapannas (Self-surrendering devotees) have for their qualifications 'the helplessness' etc. Again they are of two kinds-aspirant for Trivarga and Mokṣa.

▼ *विश्वास-प्रस्तुतिः*

धर्मार्थ-कामान् स्वाम्य्-अर्थे *(→प्रार्थनार्थत्वेन)*
येऽन्वतिष्ठंस् त आदिमाः *(त्रिवर्गपराः)* ।
*(मोक्ष-परास् तु)* सत्-सङ्गाद् अर्थ-वैराग्ये
मुमुक्षायां कृतादराः ... ॥ ८.१६॥

▼ *कृष्णमाचार्यः (En)*

16. The former group consists of those who devote themselves for Dharma, Artha and Kama for the sake of the Lord. The members of other group are those who are dispassionate for wealth by the association of good men and eager to get Mokṣa.

▼ *विश्वास-प्रस्तुतिः*

भगवद्-भोग-सम्प्राप्त्यै
महाचार्ये समाश्रिताः ।
असामर्थ्येन भक्त्य्-आदौ
प्रपत्त्येकाश्रयाः परे ॥ ८.१७॥

▼ *कृष्णमाचार्यः (En)*

17. To acquire the enjoyment of the Lord they rest on great preceptors. They resort to Prapatti alone due to their inability for practising Bhaktiyoga etc.

▼ *विश्वास-प्रस्तुतिः*

**सर्वाधिकारितां** धीराः
प्रपत्तेर् **आचचक्षिरे** ।
**एकान्तिनः** फलं मुक्त्या
सहान्यद् य उशन्ति ते ॥ ८.१८॥

▼ *कृष्णमाचार्यः (En)*

१८

Wise men say that all are qualified for Prapatti. Of these Ekantins are those who long for other objects also along with Mukti.

▼ *विश्वास-प्रस्तुतिः*

**परमैकान्तिनस्** त्व् ऐच्छन्
भगवत्-प्रीतिम् एव ये ।
प्रारब्धं कर्म भुक्त्वैव
यो मोक्षम् अभिकाङ्क्षति ...॥ ८.१९॥

▼ *विश्वास-प्रस्तुतिः*

**दृप्त, आर्तस्** तु संसारे
वह्नाव् इव समुत्तपन् ।
प्रपत्त्य्-अनन्तरे काले
यो मोक्षम् अभिकाङ्क्षति ॥ ८.२०॥

▼ *कृष्णमाचार्यः (En)*

19, 20. Paramaikāntins do care only for the satisfaction of the Lord and wish to obtain Mokṣa only. He who after experiencing the fruit of his Karman which has begun to give effect wishes to obtain Mokṣa, is called Dṛpta. But he is called Arta who feels himself greatly afflicted in Samsara as if inflamed in fire and wishes to obtain Mokşa immediately after the performance of Prapatti.

▼ *विश्वास-प्रस्तुतिः*

सत्सङ्गाद् इति सुश्लोक-द्वयोक्त-गतिमान् नरः ।*(←यति-भङ्गः)*
आविर्-भूत--स्व-स्व-रूपो मुक्तो ब्रह्मानुभूति-भाक् ॥ ८.२१॥

▼ *कृष्णमाचार्यः (En)*

21. He goes on the path described in the couple of verses beginning with Satsangat (through the association of good people) etc., and enjoy the bliss of the Brahman after getting back his real and essential nature.

▼ *विश्वास-प्रस्तुतिः*

मुक्तस्य भोगमात्रे तु
साम्यं श्रुतिषु चोदितम् ।
स्वेच्छया सर्वलोकेषु
सञ्चारोऽस्य न रुध्यते ॥ ८.२२॥

▼ *कृष्णमाचार्यः (En)*

22. Equality of the Muktas with the Brahman is only in enjoyment. This fact has been laid down in the Srutis. His free movement in all worlds is not obstructed.

▼ *विश्वास-प्रस्तुतिः*

स्वेच्छा च हरिसङ्कल्पायत्ता मुक्तस्य लभ्यते ।
अनावर्तन-शास्त्रं तु कर्मावर्त-निषेध-कृत् ॥ ८.२३॥

▼ *कृष्णमाचार्यः (En)*

23. The self-will of the Muktas is got subject to Hari's will. The rule that there is no return of Muktas from Mokṣa, prohibits only the return caused by Karman.

▼ *विश्वास-प्रस्तुतिः*

नित्यासङ्कुचित-ज्ञाना
नित्यं भगवद्-आज्ञया ।
तत्-कैङ्कर्य-रता **नित्या**
अनन्त-गरुडादयः ॥ ८.२४॥

▼ *कृष्णमाचार्यः (En)*

24. The Nityas viz. Ananta, Garuda and others are endowed with eternal knowledge which is never narrowed. They are engaged in the Lord's service on His command.

▼ *विश्वास-प्रस्तुतिः*

एतेषाम् अवतारादिर् इच्छयैव हरेर् इव ।
आधिकारिकता ऽमीषाम् ईश्वरेण निरूपिता ॥ ८.२५॥

▼ *कृष्णमाचार्यः (En)*

25. Their incarnations etc., take place only on the Lord's will. Their authority and power are determined by the Lord.

इति वेदान्तकारिकावल्यां जीवस्वरूपनिरूपणमष्टमं प्रकरणम्

# ०९ ईश्वर-निरूपणम्①

▼ *विश्वास-प्रस्तुतिः*

स्वेतराखिल-शेषित्वम्
ईश्वरस्य तु **लक्षणम्** ।
स स़ूक्ष्म-चिद्-अचिन्*(--स्व-प्रकार)*-मिश्रो
**विश्वोपादान-कारणम्** ॥ ९.१॥

▼ *कृष्णमाचार्यः (En)*

1. The characteristic of Isvara is that He is Sesin (the Lord) of all things other than Himself. He is the material cause of the universe by His nature of being qualified by the sentient and non-sentient elements in their subtle forms.

▼ *विश्वास-प्रस्तुतिः*

सङ्कल्प-युक्त एवैष
**निमित्तं कारणं** मतम् ।
कालाद्य्-अन्तर्यामितया
**सहकारि** च **कारणम्** ॥ ९.२॥

▼ *कृष्णमाचार्यः (En)*

2. The very same Lord is also the efficient cause of the universe by His nature of being qualified by the Will. [[१०४]] He is also the concurrent cause of the universe by His nature of being immanent in time etc.

▼ *विश्वास-प्रस्तुतिः*

कार्य-रूपेण वैविध्य-
योग्य् **उपादानम्** उच्यते ।
परिणामयितृत्वेन
**निमित्तम्** अपि तन्-मतम् ॥ ९.३॥

▼ *कृष्णमाचार्यः (En)*

3. That is called the material cause which undergoes different modifications in the form of effect. That is the efficient cause which brings about such modifications.

▼ *विश्वास-प्रस्तुतिः*

कार्योत्पत्त्य्-उपकारेण
**सहकारि** च तद् भवेत् ।
*(" आत्मनि खल्व् अरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्" इति)*
एक-विज्ञान-सहित--
सर्व-विज्ञान-वादतः ...॥ ९.४॥

▼ *विश्वास-प्रस्तुतिः*

**उपादानत्वम्** एवोक्तं
मृदादाव् इव चेश्वरे ।
"तदैक्षते"ति सङ्कल्पान्
**निमित्तत्वं** कुलालवत् ॥ ९.५॥

▼ *कृष्णमाचार्यः (En)*

4, 5. That is the concurrent cause which is helpful in the production of effect. There is a wise saying 'When that one is known every thing becomes known'. By this saying it has been asserted that the Lord is the material cause like the clay.
In consideration of His Will mentioned in the words 'It thought' etc. He is also the efficient cause like the potter.

▼ *विश्वास-प्रस्तुतिः*

सहकारित्वम् अप्य् अस्यान्तर्यामि-ब्राह्मणोदितम् *(←" यः पृथिवीम् अन्तरो यमयति ")*।
सद्-ब्रह्मात्मादयः शब्दाः कारणत्वावबोधिनः ...॥ ९.६॥

▼ *कृष्णमाचार्यः (En)*

6. His concurrent causation also has been stated in the Antaryami-Brāhmaṇa (The portion of Vedic Text teaching His immanency). The terms such as Sat, Brahman and Atman refer to Him as the cause (of universe).

▼ *विश्वास-प्रस्तुतिः*

... तत्र च्छाग-पशु-न्यायान्
*(सामान्यवचनस्य विशेषे पर्यवसानं यतः)*
नारायण-परा मताः ।
*("सद् एव सौम्येदम् अग्र आसीद् एकम् एवाद्वितीयम्" इत्यादौ)*
नाम-रूप-विभागानर्हत्वावस्था-समन्वितम् ...॥ ९.७॥*(←यति-भङ्गः)*

▼ *विश्वास-प्रस्तुतिः*

सुसूक्ष्म-चिद्-अचिद्-युक्तम्
एकं ब्रह्मात्मकं मतम् *(वक्ष्यमाण-काले)*।
नाम-रूप-विभागात् प्राङ्,
न हि भेदो ऽवसीयते*(=निश्चीयते)* ॥ ९.८॥

▼ *कृष्णमाचार्यः (En)*

7-9. The terms mentioned above do mean the Lord Nārāyaṇa in accordance with the rule of interpretation viz. Chaga-Paśu (Goat and Animal).
The Brahman has been held to be only one because He was qualified by the sentient and non-sentient things only in their subtlest forms and stood in such a state which did not permit Him to have any classification with different names and forms.

▼ *विश्वास-प्रस्तुतिः*

मृद्-घटादाव् अपि ततस्
"तद् एकम् *(पूर्वाह्णय् आसीद्)*" इति गीयते ।
नाम-रूपाद्य्-अभावेन
सच्-छब्देनापि गीयते ॥ ९.९॥

▼ *कृष्णमाचार्यः (En)*

Indeed no classification in the clay can be admitted before it takes any modification like pot etc. with different shapes and names. Therefore the Brahman was only one. He has also been mentioned by the term 'Sat (Being) ' because there were no different names and shapes to qualify Him.

▼ *विश्वास-प्रस्तुतिः*

तद् *(→सद्)* एवान्तः-प्रवेशेन
नाम-रूप-विभाग-कृत् ।

यथा जीवो *(शरीर-)*ऽन्तर्-आविष्टो
नाम-रूप-विभाग-भाक् ... ॥ ९.१०॥

▼ ***कृष्णमाचार्यः (En)***

10-13. The Brahman effected different names and forms by penetrating all beings as immanent Self just as the individual soul got different names and forms by entering various bodies. Just as the individual soul is denoted by the words like Deva (Divine being) etc. in their primary sense

▼ ***विश्वास-प्रस्तुतिः***

... "देवोऽहम्" इति शब्दैश् च
मुख्य-वृत्त्याभिधीयते ।
यथा नीलादयः शब्दा
नीलाद्य्-अव्यभिचारिणम् ... ॥ ९.११॥

▼ ***विश्वास-प्रस्तुतिः***

... विशिष्टम् एव मुख्यार्थं
वदन्ति निरुपाधिकम् ।
तथैव भगवान् अन्तर्-
यामी सन् नामरूपयोः ...॥ ९.१२॥

▼ ***कृष्णमाचार्यः (En)***

and just as the words like 'blue' [[११०]] etc. denote by their very nature the substance possessed with colour in primary sense, so also the Lord is denoted by all the words in their primary sense because He penetrates all the things and brings about different names and forms.

▼ ***विश्वास-प्रस्तुतिः***

... विभाग-कृत्, स तैः शब्दैर्
मुख्य-वृत्त्या ऽभिधीयते ।
अ-मुख्यार्थत्वम् एतेषां *(उदाहृत-जीव-नील-ब्रह्मणाम्)*
परैर् उक्तं न युक्तिमत् ॥ ९.१३॥

▼ ***कृष्णमाचार्यः (En)***

Some philosophers opine that these words denote their objects only in the secondary sense. But this view is not proper.

▼ ***विश्वास-प्रस्तुतिः***

शरीराद्य्-अपृथग्-भावाच्
छब्दा *(विशेषण-विशेष्यादि-)*निष्कर्षकेतरे ।
विशिष्टम् एव **श्रीमन्तम्**
**अभिधास्यन्ति** युक्तितः ॥ ९.१४॥

▼ ***कृष्णमाचार्यः (En)***

14. All the words, except those which are intended to specify Him in exclusion of His adjuncts, denote Him appropriately as qualified by adjuncts because He is inseparably connected with them.

▼ ***विश्वास-प्रस्तुतिः***

"सर्वं ब्रह्मे"त्य् "ऐतद्-आत्म्यम्"
इत्य्-आदि-व्यपदिष्टयः ।

सामानाधिकरण्येन
संयुज्यन्ते, ऽत एव हि ॥ ९.१५॥

▼ *कृष्णमाचार्यः (En)*

15. By the same reason the usages like All are Brahman" "All are in the form of Brahman " etc. can be sensibly explained in the sense of Samānādhikaranya. (A term which denotes a single thing as possessed with different attributes.)

▼ *विश्वास-प्रस्तुतिः*

स्वरूप-भिदया भेद-
श्रुतयो ऽस्मन्-मते स्थिताः ।
विशिष्टाभेदतो ऽभेद-
श्रुतयोऽपि सुनिर्वहाः ॥ ९.१६॥

▼ *कृष्णमाचार्यः (En)*

16. According to our doctrine the Vedic passages teaching the difference (between the Brahman and world) will stand firm because they mean the difference in the essential nature of them. The passages teaching the non-difference (between the Brahman and world) can be explained to mean the non-difference in His gross form.

[[११२]]

▼ *विश्वास-प्रस्तुतिः*

कारणात् सूक्ष्म-चिद्-अचिद्-
युक्तात् *(ब्रह्मणः)* स्थूलैतद् *(→चिद्-अचिद्) (जगत्)* आहितम् ।
कार्यं नान्यद् इति व्यक्तम्
आरम्भण-नयादिषु ॥ ९.१७॥ +++(" यतो वा इमानि भूतानि जायन्ते ",
“तद्-अनन्यत्वम् आरम्भण-शब्दादिभ्यः” इत्यादौ)+++

▼ *कृष्णमाचार्यः (En)*

17. In the Arambhanādikarana and other topics, it has been clearly stated that the effect qualified by the sentient and non-sentient things in their gross form is not different from the cause qualified by the subtle forms of the sentient and non-sentient things.

▼ *विश्वास-प्रस्तुतिः*

निर्गुणत्व-पराः काश्चिच्
छ्रुतयः सन्ति ता इमाः ।
तद्-धेय-गुण-राहित्यं
बोधयन्ति ततो ध्रुवम् ॥ ९.१८॥

▼ *कृष्णमाचार्यः (En)*

18. There are some Vedic passages mentioning the Brahman as devoid of qualities. They teach the absence of bad qualities in Him.

इति वेदान्तकारिकावल्यामीश्वरनिरूपणं नवमं प्रकरणम

15

元

# १० अद्रव्य-निरूपणम्①

▼ *विश्वास-प्रस्तुतिः*

द्रव्यम् एवं निरूप्याथ
तद् अद्रव्यं निरूप्यते ।
शुद्ध-सत्त्वं मिश्र-सत्त्वम्
इति **सत्त्वं** द्विधा मतम् ॥ १०.१॥

▼ *कृष्णमाचार्यः (En)*

1. Subsequent to the treatment of the substance, now the non-substance is explained. Sattva is considered to be of two kinds-Pure and Mixed.

▼ *विश्वास-प्रस्तुतिः*

रजस्तमोभ्याम् अस्पृष्टम्
अद्रव्यं **पूर्वम्**(→शुद्धम्) उच्यते ।
रजस् तमो-विमिश्रं तु
**मिश्र-सत्त्वं** प्रकीर्तितम् ॥ १०.२॥

▼ *कृष्णमाचार्यः (En)*

2. Sattva which is not associated with Rajas and Tamas is called the former (Pure-Sattva). Sattva which is associated with Rajas and Tamas is called Mixed-Sattva.

▼ *विश्वास-प्रस्तुतिः*

अतीन्द्रियं प्रकाशादि-
निदानं **सत्त्व**-शब्दितम् ।
**रजो** लोभ-प्रवृत्त्य्-आदि-
निदानं कीर्त्यते, **तमः** /.. ॥ १०.३॥

▼ *कृष्णमाचार्यः (En)*

3. Sattva which is beyond the range of the senses brings about the brightness to the objects. Rajas is said to give rise to avarice, activity etc. Tamas is described as following:

▼ *विश्वास-प्रस्तुतिः*

... प्रमाद-मोहादि-हेतुर्,
इत्थं त्रैगुण्य-रूपणम् ।
**लये** समानि चैतानि,
विषमाण्य् **उदयादिषु** ॥ १०.४॥

▼ *कृष्णमाचार्यः (En)*

4. It (Tamas) is the cause for carelessness, delusion and others. Thus is triad of qualities. During the dissolution of the world, these qualities remain in the state of equilibrium. But when the creation takes place, they become divercified.

▼ *विश्वास-प्रस्तुतिः*

श्रोत्र-ग्राह्यो गुणः **शब्दो**
वर्णावर्णात्मना द्विधा ।

तालु-भेर्यादि-जत्वेन
भूत-पञ्चकवर्त्य् असौ ॥ १०.५॥

▼ *कृष्णमाचार्यः (En)*

5. The quality which is cognoscible by the sense of hearing is called Sound. It is of two kinds- lettered and non-lettered according to their production from the organs palate etc. and instruments drum etc. respectively. It abides in all the five elements.

▼ *विश्वास-प्रस्तुतिः*

**स्पर्शस्** त्वग्-इन्द्रिय-ग्राह्यः
पृथिव्य्-आदि-चतुष्टये ।
शीतोष्णादि-प्रभेदस् तु
शास्त्रान्तर-निरूपितः ॥ १०.६॥

▼ *कृष्णमाचार्यः (En)*

6. The quality which is cognoscible by the sense It abides in the four of touch is called Touch. elements earth etc. Its division as cool, warm etc. has been described in other śastras.

▼ *विश्वास-प्रस्तुतिः*

चक्षुरिन्द्रियनिर्ग्राह्यं
**रूपम्,** एतच् चतुर्विधम् ...।
श्वेत-रक्ते पीत-कृष्णे
इति भेदाद्, द्विधा ऽऽदिमम्*(→ श्वेतम्)* ॥ १०.७॥

▼ *कृष्णमाचार्यः (En)*

7. The quality which is cognoscible by the sense of vision is called colour. It is of four kinds-white, red, yellow and black. Again the first (white) is of two kinds :

▼ *विश्वास-प्रस्तुतिः*

भास्वराभास्वरत्वाभ्यां
**भास्वरं** तेजसि स्थितम् ।
पृथिवी-जलयोश् चैतद्
**अभास्वरम्** उदाहृतम् ॥ १०.८॥

▼ *कृष्णमाचार्यः (En)*

8. One of them is brilliant and the other non- brilliant. The brilliant colour is seen in luminous things. The non-brilliant colour is said to exist in earth and water.

▼ *विश्वास-प्रस्तुतिः*

रसनेन्द्रिय-निर्ग्राह्यो
**रसः** षोढा स कीर्तितः *(मधुराम्ल-लवण-तिक्त-रूक्ष-कषाय-भेदात्)* ।
घ्राण-ग्राह्यो गुणो **गन्धो**
*(सुरभ्यसुरभिभेदेन)* द्विधा शास्त्रान्तरेष्व् इव ॥ १०.९॥

▼ *कृष्णमाचार्यः (En)*

9. The quality which is cognoscible by the sense of taste is called Taste. It is said to be of six kinds. The quality which is cognoscible by the sense of smell is called Odour. It is held to be of two kinds like in other śastras.

▼ *विश्वास-प्रस्तुतिः*

पृथिव्याम् एव **गन्धः** स्यात्
पृथिवी-जलयो **रसः** ।
पृथिवी-जल-तेजःसु
**रूपं**, स्पर्शः *(पृथिवी-जल-तेजःसु)* स-वायुषु ॥ १०.१०॥

▼ *कृष्णमाचार्यः (En)*

10. Odour abides in earth only. Taste abides in earth and water. Colour abides in earth, water and luminous objects. Touch abides in all the three mentiond above and in wind.

▼ *विश्वास-प्रस्तुतिः*

**शब्दः** पञ्चसु भूतेषु
प्राधान्येनैवम् उच्यते ।
**पञ्चीकरण**-रीत्या तु
सर्वे सर्वत्र सङ्गताः ॥ १०.११॥

▼ *कृष्णमाचार्यः (En)*

11. Sound abides in all the five elements. The above classification is based on their predominance. But according to the process of Pañcikarana (five- fold combination of the elements) all these qualities abide in all the five elements.

[[१२०]]

▼ *विश्वास-प्रस्तुतिः*

संयुक्त-प्रत्यये *(संयुक्त-व्यवहारे च)* हेतुः
**संयोग** इति कथ्यते ।
कार्याकार्य-प्रभेदेन
स संयोगो द्विधा मतः ॥ १०.१२॥

▼ *कृष्णमाचार्यः (En)*

12. That is called Sariyoga (conjunction) which is the cause of the cognition of the substances as conjoined together. Conjunction is considered to be of two kinds-effected and non-effected.

▼ *विश्वास-प्रस्तुतिः*

*(चन्द्रस्य)* मेष-हस्तादि-संयोगः
*(कदाचिद् एव जायमानत्वात्)* कार्यो, ऽकार्यो विभोर् विभोः ।
विभु-द्वयस्य संयोगः
श्रुत्या युक्त्या च मन्यते ॥ १०.१३॥

▼ *कृष्णमाचार्यः (En)*

[[१२१]]

13. The conjunction which is seen between the goat and the hand is the effected conjunction. The conjunction which is seen between two all-pervading things is the non-effected conjunction. The conjunction between two all-pervading things is accepted on the strength of the scripture and reasoning.

▼ *विश्वास-प्रस्तुतिः*

तस्मात् कालस्येश्वरेण
संयोगोऽपि सुसम्मतः ।
संयोगाभावरूपो हि
**विभागो** न गुणान्तरम् ॥ १०.१४॥

▼ *कृष्णमाचार्यः (En)*

14. Therefore the conjunction between Iśvara and time is well approved. Disunion is only the absence of conjunction. Hence it is not a separate quality.

▼ *विश्वास-प्रस्तुतिः*

सर्व-हेतुषु हेतुत्व-
निर्वोढ्री **शक्तिर्** इष्यते ।
मणि-मन्त्रादिकेष्व् एषा
प्रसिद्धा - सा त्व् **अतीन्द्रिया** ॥ १०.१५॥

▼ *कृष्णमाचार्यः (En)*

15. Potency is that quality which helps the causation in all causes. This is seen in gems, mystical spell etc. But it is beyond the scope of the senses.

▼ *विश्वास-प्रस्तुतिः*

**बुद्ध्यादयो***(=बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माधर्माख्याः)* ऽष्टौ *([जीवेश्वरयोः] धर्म-भूत-)***विज्ञाने**
**भावना***(=परिचितार्थे बुद्धि-प्रसरः)* चान्तर् **आविशन्** ।
द्रवत्व*(=fluidity)*-स्नेह-सङ्ख्यान-
परिमाणानि वेगकः ...॥ १०.१६॥

▼ *कृष्णमाचार्यः (En)*

16-18. The eight qualities viz. cognition, etc. and reminiscence are included in Consiousness.

▼ *विश्वास-प्रस्तुतिः*

... द्रव्य-स्वरूप-रूपत्वान् *(तत्रैव परिगणनीयत्वान्)*
नाधिक्यं यान्ति केवलम् ।
स्थित-स्थापकम्*(=Elastic distension)* एतस्मिन्
संयोगे ऽन्तर् भवत्य् अतः ॥ १०.१७॥

▼ *कृष्णमाचार्यः (En)*

Fluidity, vicidity, number, size and speed are nothing but the nature of the relevant substances. Therefore they do not exceed the number of qualities enumerated.

▼ *विश्वास-प्रस्तुतिः*

संयोगाभाव-रूपत्वात्
पृथक्त्वस्य विभागवत् *(न पुनः परिगणनीयता)* ।
गुरुत्वस्यापि शक्तित्वान्
*(परिगणनीयतायां)* नाधिक्यं क्वापि विद्यते ॥ १०.१८॥

▼ *कृष्णमाचार्यः (En)*

Elasticity is included in conjunction. Like disunion, separateness also is of the nature of the absence of contact. Weight also is a kind of potency. Therefore these is no separate quality in excess of the qualities enumerated.

▼ *विश्वास-प्रस्तुतिः*

कर्मणाम्(=संयोग-विभाग-जनकानां) अपि शक्तित्वं
केचिद् आहुर् मनीषिणः ।
पदार्थान्तरताम् अन्ये
प्राहुर् वेदान्त-वेदिनः ॥ १०.१९॥

▼ *कृष्णमाचार्यः (En)*

19. Some wise men say that Karman (action) also is included in potency. But other Vedantins say that it is a separate quality.

▼ *विश्वास-प्रस्तुतिः*

प्राचीन-ग्रन्थ-पदवीम्
अनुसृत्य यथा-मति ।
विशिष्टाद्वैत-सिद्धान्त-
फक्किका(=सङ्क्षेपः) +इत्थं निदर्शिता ॥ १०.२०॥

▼ *कृष्णमाचार्यः (En)*

20. Following the way of the earlier texts, the logical exposition of the Viśiṣṭadvaita system is exemplified to the best of my judgment.

▼ *विश्वास-प्रस्तुतिः*

अण्णयार्याध्वरीन्द्रस्य
तार्तीयीक-तनू-भुवा ।
श्रीमद्-वेङ्कट-दासेन
निर्मिता कारिकावली ॥ १०.२१॥

▼ *कृष्णमाचार्यः (En)*

21. This string of concise verses has been composed by Venkaṭadāsa, the third son of Annayarya.

[[१२५]]

▼ *विश्वास-प्रस्तुतिः*

निरमायि रमायत्त-
परमाद्भुत-तेजसः ।
मुदम् आधातु-कामेन
मयेयं कारिकावली ॥ १०.२२॥

▼ *कृष्णमाचार्यः (En)*

22. This string of concise verses was composed by me with a desire to please the Lord of great marvellous lustre which is dependent on Lakṣmi.

[[१२६]]

▼ *विश्वास-प्रस्तुतिः*

भक्ति-प्रपत्त्योर् अधिदेवताभ्याम्
इवाब्ज-नाभस्य पदाम्बु-जाभ्याम् ।
समर्पये ऽस्मन्-मत-कारिकावलीं
तद्-अङ्गुली-सङ्ख्य-निरूपणाढ्याम् ॥ १०.२३॥

▼ *कृष्णमाचार्यः (En)*

23. I dedicate at the lotus-feet of the Lord (having the lotus in the navel) which feet seem as presiding deities of Devotional meditation and Self-surrender, the string of concise verses of our system of thought, whose chapters are in the same number as that of the fingers of those feet.

▼ *विश्वास-प्रस्तुतिः*

यः श्रीमच्--छठ-मर्षणान्वय-पयः-सिन्धोः सुधांशुर् महान्
अण्णार्यः समभूद् विभूषित-*(न्याय-व्याकरण-मीमांसा-शारीरकाख्य-)*चतुस्-तन्त्रो वचः-कान्तिभिः ।
तस्यासौ तनयः समार्जित-नयः श्रीवेङ्कटार्यः सुधीः
श्रुत्य्-अन्तान्वय-कारिकालिम् अकरोत् प्रीत्यै महत्यै सताम् ॥ १०.२४॥

▼ *कृष्णमाचार्यः (En)*

24. Great Annayārya who was the moon of the milky ocean of the family of S'athamarṣaṇa, beautified the four śastras with his brilliance of expression. His son Venkaṭārya of great intellect, well equipped with the philosophical thought, wrote this string of concise verses on Vedanta to the entire satisfaction of the good.

▼ *कृष्णमाचार्यः (En)*

Thus here ends the tenth chapter entitled the treatment of non-substance, of the work called the Vedantakarikavali composed by Bucci Venkaṭācārya, the third son of Anṇayaryasomapithin, who was the moon of the ocean of S'athamarṣaṇa family and seer of other shore of six darsanas.

# Appendix - +Dyugangā द्युगङ्गा①

## Goals ध्येयानि②

Dyugangā (https://rebrand.ly/dyuganga) is a work group dedicated to the promotion of ever-victorious Hindu ideals and arts. It's current focus is in presenting important texts for easy study.

The texts may be presented as

- audio files (eg: MahAbhArata audio book project),
- as web pages (eg. Apastamba-gRhya-sUtra, Apastamba-dharma-sUtra, EkAgnikANDa commentary, manu-smRti, raghuvaMsha, more kalpa-texts, tattva-texts, universal subhAShita DB),
- as dictionaries (eg: stardict)
- ebooks distributed on various platforms - (eg: vishvasa.github.io/book-pub, amazon, google play - SVK SVT का). Formats include md, pdf (A4, A5), epub, azw3, html, etc.

We distribute these for free, and under a CC BY 4.0 license. (Platforms may levy their fees.)

You may subscribe to mail-streams for past and future announcements (dg, hv, san).

The choice of material heavily depends on the special interests of its current lead (vedas, kalpa, purANa-s).

## संस्कृतानुवादः③

द्युगङ्गा नाम कार्यसंस्था ऽजेयानां भारतीयपुरुषार्थपरिकल्पनानाञ्च हिन्दुककलानाञ्च प्रसारणाय वर्तते। तदीयस् स्थूलोद्देशोऽधुना प्रमुखग्रन्थानाम् अध्ययनसौकर्याय प्रस्तुतिः। ततो ग्रन्थसङ्कलनकेन्द्रम् इति वक्तुमलम्।

ग्रन्थानाम् प्रस्तुतिर् ध्वनिसञ्चिकाभिस् स्यात् (यथा महाभारतपारायणप्रसारणे), जालक्षेत्रपृष्ठैर् वा (यथा विश्वासस्य मन्त्रटिप्पनीषु, एकाग्निकाण्डटीका), शब्दकोशैर् वाऽपि (stardict)।

सद्यश्च ग्रन्थाः संस्थाग्रण्या रुचिविशेषम् अनुसृत्य चिताः - वेदाः, इतिहासपुराणानि, कल्पवेदाङ्गग्रन्थाश् चेति।

## Contribution दानम्③

Donations and sponsorship are welcome (use contact page on our website) - they help offset operating costs (eg. worker payments mainly ~1L/mo, book distribution) and plan further projects. Project-specific sponsorship opportunities are occasionally advertised on our social media accounts and on certain mailing lists.

# Table of Contents


ॐ 3
०१ प्रत्यक्ष-निरूपणान्तम् 4
०२ अनुमान-निरूपणम् 12
०३ शब्द-निरूपणम् 15
०४ प्रकृति-निरूपणम् 19
०५ काल-निरूपणम् 30
०६ नित्य-विभूति-निरूपणम् 32
०७ धर्मभूतज्ञान-निरूपणादि 37
ज्ञानम् 37
भक्ति-प्रपत्ती 38
०८ जीव-निरूपणम् 42
०९ ईश्वर-निरूपणम् 48
१० अद्रव्य-निरूपणम् 52
Appendix - +Dyugangā द्युगङ्गा 58
Goals ध्येयानि 58
संस्कृतानुवादः 58
Contribution दानम् 58